## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट '**संस्कृतप्रसारपरिषद्**' इति नाम्ना '**आरा**' ( **विहारः** ) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - विंशं वर्षम्, प्रथमोऽङ्कः

चैत्रः, वि.सं. २०७०

मार्च, २०१३

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

वार्षिकं शुल्कं ५० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

⊛

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

⊛

सम्पादकः

**प्रो. गोपबन्धु मिश्रः**

संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

⊛

सह-सम्पादकः

**डॉ. सुनीलकुमार प्रधानः**

⊛



प्रकाशिका

**संस्कृतप्रसारपरिषद्**

महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

⊛

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

प्रसन्नता प्रसादहेतुकतामाश्रयते। प्रसादस्तु प्रसाद्यस्य प्रसादनाय प्रवर्तते, किन्तु सर्वदा अभीष्टोऽसौ प्रसाद्यः प्रसन्नतां नाधिरोहति। अतः विपुलायां प्रसादसामग्र्यां सत्यामपि तैः प्रसादनमेव साधीयस्स्यादिति निश्चयो नाभिलक्ष्यते। तादृश्यामवस्थायामपि प्रसाद्यो जनो भूयो विषीदन् परिलक्ष्यते लोके। एनं हेतुहेतुमद्भावानिश्चयं मत्वा भर्तृहरिर्भाषते–

**वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या**
**सम इह परितोषो निर्विशेषो विशेषः।**
**स तु भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।**

(वैराग्यशतकम्, 49)

अत्र दारिद्र्यस्य विषादजनकतामभिधाय दार्शनिकः कविः धनाभावापेक्षया तृष्णायाः विशालतामेव दारिद्र्यहेतुत्वेनोपस्थापयति तथा च तृष्णायाः वैशाल्याय नैयून्याय वा मनसः आसन्तोष्यं पारितोष्यं वा हेतुं मनुते। एवं क्रमेण अन्ततः मनसः स्थितिः वृत्तिः वा प्रसन्नतायाः अनन्यो हेतुर्भवतीति निश्चयवाक्यं निष्कृष्टतामाधत्ते। अत्र तृष्णायाः 'विशाला' इति विशेषणाख्यानेन एतदपि स्पष्टीभवति यत् न्यूना वा विशाला वा स्यान्नाम तृष्णा तु तिष्ठत्येव, किं च यद्यपि तस्याः विशालता स्वाभाविकी तथापि सा विशालता न्यूनीकर्तुं सर्वथा शक्याऽस्तीति।

प्राचीने काले जनाः आसन्, तेषां तृष्णापि आसीत्, किन्तु सम्भवतः सा तथा विशाला नासीत् यथा आधुनिककाले अस्ति, किं च क्षणं प्रतिक्षणं विशालतरतां भजतेऽपि। विशेषतः व्यक्तिवादस्य वैयक्तिकविकासवादस्य च महत्तां पोषयत्यस्मिन् युगे तत्तदाधुनिकविद्यावन्तः नवा युवानः अल्पीयसि वयस्येव लब्धोच्चोपाधिधारिणः स्वायत्तसेविभ्यः उद्योगतन्त्रेभ्यः अतीव आकर्षकवेतनप्राप्तिसहितम् उद्योगं लभन्ते। किं च ततोऽप्यधिकं कामयमानाः अहोरात्रं यन्त्रवत् कार्याणि कुर्वन्तो यान्त्रिकं जीवनं

जीवन्ति। परिणामतः उत्कृष्टसाहित्यसङ्गीतकलाविहीनां जीवनयात्रां कुर्वन्तो धनोपार्जनकारि किमपि यन्त्रमिव आत्मानं परिवर्तयन्ति। यास्केन निरुक्ते 'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति' इति ये षड् भावविकाराः उल्लिखिताः तेषु आद्यास्त्रयस्तु तृष्णाया भवन्ति–जायते, अस्ति, वर्धते इति। किन्तु ततः परं भावविकाराणामितरेषां स्वरूपं किञ्चिद् भिन्नं भवति–विपरिणामयति, अपक्षाययति, विनाशयति इति उत्प्रेरिकाः क्रियाः तृष्णायाः उत्पद्यन्ते। तेन तादृशाः सतृष्णाः युवानोऽपि विविधरोगग्रस्ताः भवन्ति, मनुष्याः अपि भारवाहकाः पशवः इव आत्मानुगुणं जीवनम् अजीवित्वा अर्थाश्रितं पराश्रितं वा कृत्रिमं जीवनं जीवन्ति। तत्रापि आर्थिकतारतम्यकारणेन पदप्रतिष्ठगतोच्चनीचादिभेदबोधविमर्शकारणेन वा कदाचित् आत्महत्यादि गर्हितं कार्यमपि कुर्वाणाः दृश्यन्ते। एतस्यां स्थितौ भर्तृहरेः कथनमिदं यत्, मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः इति तत् समधिकं महत्त्वपूर्णं भवति। किं च गीतायां यद् भगवता आत्मनः बन्धुत्वविमर्शनं विहितम्, तदपि अधिकं प्रासङ्गिकं प्रतीयते, तद्यथा–

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।** (गीता 6/8)

एतादृशं संस्कृतवाङ्मयगतं विस्तृतं सूक्ष्मं च विश्लेषणम् आधुनिके काले समधिकाम् उपयोगितां निर्वर्तयति। तत्तद्विश्लेषणरतैः चिन्तकैः चिन्त्यताम्, गवेषकैर्गवेषणा विधीयताम्, पाठकैः पठ्यतां सदवृत्तानुसारिभिस्सर्वैः भूयताम् इत्युद्दिश्य आरण्यकस्यायम् अङ्कः समुपस्थितोऽस्ति इति शम्।

मार्च, 2013

विद्वद्वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकस्य



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. **भावाभासस्य काव्ये महत्त्वम्** | प्रो.केदारनाथ शर्मा<br>आई.सी.सी.आर अतिथ्यध्यापकः (संस्कृतम्)<br>सिल्कन विश्वविद्यालयः,<br>बैंकक (थाईलैण्ड) | १ |
| २. **नयागडमण्डले संस्कृत-धारायाः परम्परा** | डॉ. जगमोहन आचार्य<br>एसिस्टेंट प्रोफेसर (संस्कृतम्)<br>खड्गपुर महाविद्यालयः<br>खड्गपुरम् (पं.ब.) | १७ |
| ३. **चार्वाकदर्शनस्य प्रयोजिनीयम्** | बङ्गीयं मूलम् - स्वामी प्रज्ञानन्दसरस्वती<br>संस्कृतानुवादकः - श्री सुदीप्तमुन्सी<br>८१, झाउतला रोड<br>पार्क सर्कस, कोलकाता - १७ | २३ |
| ४. **संस्कृतज्ञानाम् आधुनिकीतिकर्तव्यता** | डॉ. के.अरविन्द रावः<br>प्राप्तावसरः आरक्षी-महानिदेशकः (आई.पी.एस्.)<br>आन्ध्रप्रदेशः | २९ |
| ५. **भासकालिदासयोः नाटकेषु स्त्रीपात्राणि** | डॉ. के. उण्णिकृष्णन्<br>असिस्टेंट प्रोफेसर (साहित्यविभागः)<br>सर्वकारीय संस्कृत महाविद्यालयः<br>तिरुवनन्तपुरम् - ३४ (केरलम्) | ३५ |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| ६. चण्डीशतके विवर्तवादः | रीना देवी<br>शोधच्छात्रा (जे.आर.एफ)<br>संस्कृतविभागः, कलासंकायः<br>काशी हिन्दू विश्वविद्यालयः<br>वाराणसी | ४१ |
| ७. 'साधकतमं करणम्' इति सूत्रस्य विशकलितार्थः | डॉ. श्रीप्रकाश पाण्डेयः<br>आसोसिएट प्रोफेसर (संस्कृतम्)<br>बी.आर.अम्बेडकर बिहार विश्वविद्यालयः<br>मुजफ्फरपुरम् (बिहारः) | ४७ |




# भावाभासस्य काव्ये महत्त्वम्

**प्रो. केदारनाथ शर्मा**

रसभावयोरिव रसाभास-भावाभासावपि काव्यस्य महत्त्वपूर्णतत्त्वे भवतः। रसभावौ शुद्धौ निर्मलौ च भवतः। एतयोरनौचित्यस्य संस्पर्शोऽपि न भवति, परन्तु रसाभासे भावाभासे च अनौचित्यस्य स्थितिरनिवार्या भवति। वस्तुतः अनौचित्यमेव एतयोः प्राणतत्त्वम्। काव्यादिगत-भावसामग्रीषु शास्त्रविरुद्धत्वम्, लोकाचारहीनत्वम्, अस्वाभाविकत्वञ्च सहृदयानां हृदये अनौचित्यानुभवं जनयन्ति, येन भावाभावस्य अभिव्यक्तिर्भवति। अभिनवगुप्त-मम्मट-रुय्यक-हेमचन्द्र-जयदेव-विश्वनाथ-शिङ्गभूपाल-अप्पयदीक्षित-जगन्नाथ-राजचूडामणि-अच्युताचार्यादिभिः सर्वैरपि संस्कृताचार्यैः अनौचित्यमेव भावाभासस्य आधारत्वेन उत वा प्राणतत्त्वरूपेण स्वीकृतम्। अनौचित्यञ्च लोकशास्त्रादिविरुद्धवर्णनाश्रितम्। परन्तु अत्रैतद् अवधारणीयं भवति यत् भावाभासस्य मूले विद्यमानम् अनौचित्यं काव्ये आस्वाद्यत्वं न दूषयति- अनौचित्यसम्पृक्तोऽपि भावाभासः सहृदयानाम् आस्वाद्यत्वेन उत्तमकाव्यस्यैव विषयः। तेनैव 'रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावाभासोऽपि रसपरिवारे परिगणितः मम्मटादिभिः, तस्य रसनयोग्यत्वाद्। अतः भावाभासस्य आस्वादविषयत्वम् अव्याहतमेव। औचित्यानौचित्ययोः सन्तुलित-वर्णनेनैव कुशलः कविः उत्तमकाव्यं रचयति। आदर्श-अनादर्शयोः, गुण-दोषयोः, नायक-प्रतिनायकयोः संघर्षवर्णनेन काव्यनाट्यादिकम् अधिकं रुचिकरं ग्राह्यं च भवति। तथा च अनादर्श-दोष-प्रतिनायकादिवर्णनम् अनौचित्यमूलत्वेन भावाभासं रसाभासं वा जनयति। समाजे व्यक्तिचरित्रे वा यथा आदर्शापेक्षया अनादर्शस्य बाहुल्यं दृश्यते, तथैव काव्यादिषु अपि औचित्यमूलरसभावापेक्षया अनौचित्यमूलयोः रसाभास-भावाभासयोर्विषयक्षेत्रं विपुलतरं विद्यते।

शोधपत्रस्य अग्रिमपृष्ठेषु अभिनवगुप्तादिसंस्कृताचार्याणां भावाभासविषयकं मतं समीक्ष्य काव्यनाट्यादिषु भावाभासस्य महत्त्वम्, उपयोगित्वम्, अनिवार्यत्वं च दृष्टान्तादिनिर्देशपुरस्सरं प्रतिपादयिष्यते।

## भावाभासस्य लक्षणम्

संस्कृतस्य प्रायः सर्वैरपि प्रमुखाचार्यैर्भावाभासस्य लक्षणं प्रदत्तम्। तेषु कानिचित् लक्षणानि इमानि सन्ति-

1. अभिनवगुप्तः - 'अनौचित्येन प्रवृत्तौ चित्तवृत्तेरासाद्यत्वे स्थायिन्या रसो व्यभिचारिण्या भावः, अनौचित्येन तदाभासः।'[1]

2. मम्मटः - **तदाभासा अनौचित्यप्रवर्तिताः।**[2]

3. रुय्यकः - **आभासत्वविषयप्रवृत्त्यानौचित्यम्।**[3]

4. हेमचन्द्रः - (क) **निरिन्द्रियेषु तिर्यगादिषु चारोपात् रसभावाभासौ।**[4]

(ख) **अनौचित्याच्च।**[5]

(ग)**अन्योन्यानुरागाद्यभावेन अनौचित्यात् रसभावाभासौ।**[6]

5. जयदेवः - **सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया।**
**अनौचित्या रसाभासा भावाभासाश्च कीर्त्तिताः॥**[7]

6. विश्वनाथः - **अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः।**[8]

7. शिङ्गभूपालः - **आभासता भवेदेषामनौचित्यप्रवर्त्तितानाम्।**
**असत्यत्वादयोग्यत्वादनौचित्यं द्विधा भवेत्॥**[9]

8. अप्पयदीक्षितः - **अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभासश्चेति उच्यते।**[10]

9. जगन्नाथः - **एवमेवानुचितविषया भावाभासाः।**[11]

10. अच्युताचार्यः - **असंमतालम्बित्वादयोग्यविषयत्वतः।**
**रसाभासा भावाभासश्च स्युरनुक्रमात्॥**[12]

उपर्युक्तेषु लक्षणेषु अनौचित्येन प्रवृत्ताः भावाः एव भावाभासा इति कथिताः। जयदेवप्रस्तुते भावाभासलक्षणे एवञ्च हेमचन्द्र-शिङ्गभूपाल-अच्युताचार्याणां विवेचने वैशिष्ट्यं परिलक्ष्यते भावाभासस्योदाहरणप्रसङ्गेषु एतद् विवेचयिष्यते।



## भावाभासस्य वर्ण्यविषयाः-

**संस्कृतकाव्यशास्त्रे भावस्य त्रयो भेदाः स्वीकृताः-**

1. देवादिविषया रतिः,

2. प्राधान्येन व्यञ्जितो व्यभिचारी,

3. अपरिपुष्टः स्थायी च।[12] अपरिपुष्टस्थायिनः भावसंज्ञा यद्यपि मम्मटादिभिः पूर्वाचार्यैर्नैव कृता, परन्तु काव्यप्रकाशस्य टीकाकारेण रसगङ्गाधरस्य च टीकाकारेण अपरिपुष्टः स्थायी भावसंज्ञया अभिहितः।[14]

4. देवादिशब्दात् देवता-मुनि-गुरु-नृपपुत्रादयो गृह्यन्ते।[15] देवादिविषया रतिः, पुत्रविषया रतिः (वात्सल्यम्) च परवर्त्तिभिः रूपगोस्वामि-विश्वनाथप्रभृतिभिराचार्यैः क्रमशः भक्तिः[16] वात्सल्यञ्च[17] रस इति स्वीकृते।

5. निर्वेदादयः त्रयस्त्रिंशद् भावाः व्यभिचारिण इत्युक्ताः।[18]

6. रति-हास-शोक-क्रोध-उत्साह-भय-जुगुप्सा-विस्मय-शमाः स्थायिनः।[19] परवर्तिभिराचार्यैः वत्सलता भगवद्रतिश्चापि स्थायिषु परिगणिते।[20] एवम् प्रकारेण इमे भवन्ति भावाभासस्य वर्ण्यविषयाः-

1. अनौचित्येन प्रवर्त्तिता मुनि-गुरु-नृप-मित्रादिविषया रतिः।

2. प्राधान्येन व्यञ्जिताः निर्वेदादयः त्रयस्त्रिंशद् व्यभिचारिणः।

3. विभावादिभिरपुष्टानां रत्यादिस्थायिभावानां अनौचित्येन प्रवृत्तिश्च।

भावाभासस्य पूर्वोक्तेषु त्रिषु प्रकारेषु पूर्वाचार्यैः स्वग्रन्थेषु केवलं प्रथम-द्वितीयप्रकारयोरेव विवेचनं कृतं विद्यते।

## भावाभासस्य भेदाः, उदाहरणानि च

संस्कृतकाव्याचार्यैः अधोलिखितप्रसङ्गेषु भावस्य अनौचित्यं स्वीकृत्य सोदाहरणं विवेचनं प्रस्तुतम्--

(क) अनौचित्येन प्रवर्तिता देवादिविषया रतिः--अस्याः प्रकारद्वयं निर्दिष्टम्-

1. अनेकदेवताविषयिणी रतिः,

2. शत्रूणां राजस्तुतिः।

(ख) प्राधान्येन व्यञ्जितानां व्यभिचारिभावानाम् अनौचित्येन प्रवृत्तिः

अस्या इमे प्रकाराः विवेचिता आचार्यैः-

1. गुरु-मुनि-आदीनां कन्यायां भार्यायां वा भावप्रदर्शनम्
2. परभार्यां प्रति भाववर्णनम्
3. अननुरक्तायां भावप्रकटनम्
4. स्वभावप्रतिकूलस्य भावस्य वर्णनम्
5. अधमपात्रभाववर्णनम्
6. पशुपक्षिगत-भाववर्णनम्
7. निरिन्द्रिय-गत-भाववर्णनं च। एतेषु कतिपयानाम् उदाहरणानि प्रस्तूयन्ते-

**(क) अनौचित्येन प्रवर्तितायाः देवादिविषयरतेः उदाहरणम्**

**1. अनेकदेवतासु रति (श्रद्धा) प्रदर्शनम्-**एकस्याः नायिकाया अनेकनायकविषया रतिः शृङ्गाराभासत्वेन स्वीकृता मम्मटेन।[21] तदनुसृत्य चन्द्रालोकस्य कर्त्ता जयदेवः भक्तस्य अनेकदेवविषयां रतिं (श्रद्धां) भावाभासं मन्यते।[22] चन्द्रालोकस्य टीकाकारः गागाभट्टः निमोक्तं पद्यम् अनेकदेवतानिष्ठश्रद्धात्वेन उद्धृतवान्-

**अन्यैः समोऽसि वरदो देवैरपि जगत्पते।**
**तथापि त्वामहं वन्दे कालकूटस्य धारणात्॥**[23]

अत्र कश्चिद् भक्तः वरदानकर्मणि शिवम् अन्यदेवैः समं मत्वा अनेकदेवता विषयिणीं श्रद्धां प्रकटयन्नस्ति। अतः भावाभास्यायं श्लोकः। भक्तिं स्वतन्त्ररसत्वेन स्वीकुर्वाणानां रूपगोस्वामिप्रभृतीनामाचार्याणां मते तु पद्यमिदं भक्तिरसाभासस्योदाहरणम्।

एवमेव अनेकगुर्वादिविषयायाः श्रद्धायाः प्रदर्शनेऽपि भावाभासो बोद्धव्यः।[24]

**2. शत्रूणां राजस्तुतिः-**श्रद्धा भक्तिश्च स्तुतेः आधारभूते। श्रद्धाविहीनेन विहितायां स्तुतौ स्तुतिकर्तुः विवशता स्वार्थश्च परिलक्ष्येते। कमपि शत्रुं स्तुतिकर्मनिरतं दृष्ट्वा सहृदयः पाठकः श्रोता वा तस्य (शत्रोः) पूर्वकृतं वैरं स्मरति तस्य च स्तुतौ स्तुतिकर्तुः स्वार्थं कपटतां विवशताञ्च अनुभवति। फलतः तस्य स्तुतौ पूर्णतया भावमग्नो नैव भवति। तेनैव आचार्यमम्मटेन शत्रुकृतायां राजस्तुतौ भावाभासः स्वीकृतः, यथा-



**अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारान्निधे।**
**विध्वस्तो विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे॥**[25]

कविः कथयति-भो राजन्! तव शत्रवः एवं स्तुवन्ति-'भो औचित्यस्य वारिधेऽस्मत्पुण्यकर्मभिस्त्वं दृष्टिपथं यातः। तस्मात् (भवद्दर्शनेन) अस्माकं समस्ता अपि विपदो नष्टा इति। अत्र श्लोकार्द्धे शत्रवः राजस्तुतिं कुर्वाणाः वर्णिताः। शत्रुकृता च स्तुतिः अनौचित्येन आचार्यैर्भावाभासः स्वीकृतः। एवमेव स्वार्थपूर्णायां कपटयुक्तायां च स्तुतौ प्रशंसायां वा भावाभासो मन्तव्यः।

**(ख) अनौचित्येन प्रवृत्तानां व्यभिचारिभावानां उदाहरणानि-**

**(1) गुरु-मुनि-कन्या-भार्यागतभाववर्णनम् -** मुनयो गुरवश्च भवन्ति अस्माकं श्रद्धास्पदाः। श्रद्धाकामौ च परस्परविरुद्धभावौ। अतः पूज्यानां गुर्वादीनां परिवारजनेषु व्यक्ता कामना अनौचित्यं जनयति। एतेषां कन्यां भार्यां वा प्रति प्रेमभावप्रदर्शनं भारतीयसहृदयानां संस्कारविरुद्धम्। अतः तेषां कन्यां भार्यां वा अभिलक्ष्य प्रदर्शितेषु भाववर्णनेषु सहृदयमनसि वितृष्णा जायते। तेनैव आचार्यविश्वनाथ[26]-जगन्नाथ[27]-अच्युताचार्य[28]-प्रभृतिभिराचार्यैः मुनिगुरुपत्नीगतायां रतौ रसाभासः स्वीकृतः।

धर्माचार्यैरपि पूज्यानां स्त्रिभिः सहवासः भृशं निषिद्धः।[29]

**(1) गुरुकन्यां प्रति भावप्रदर्शनम्-**जगन्नाथेन गुरुकुलवासिनः कस्यापि छात्रस्य गुरुकन्यायाः स्मरणे अनौचित्यं स्वीकृत्य भावाभासस्य उदाहरणत्वेन इदं पद्यमुद्धृतम्-

**सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता विद्यापि खेदकलिता विमुखीबभूव।**
**सा केवलं हरिणशावकलोचना मे नैवापयाति हृदयादधिदेवतेव॥**[30]

"गुरुकुले विद्याभ्याससमये तदीयकन्यालावण्यगृहीतमानसस्यान्यस्य वा कस्यचिद्-तिप्रतिषिद्धगमनां स्मरतो देशान्तरं गतस्येयमुक्तिः।"[31]

अत्र स्मृतिभावोऽनुचितविषयकः अर्थात् गुरुकन्यागतः उत वा अगम्यनायिका-विषयकः वर्तते, अतः स्मृतिभावस्य अनौचित्यत्वेन भावाभासः। अनुभयनिष्ठा चेयं स्मृतिः-केवलं नायकः स्मरति, न नायिका। अतः एकपक्षीया अपि, एतदपि भावाभासस्य कारणम्।[32]

पद्यरूपा चेयमुक्तिः नायिकायाः पत्युरेव चेत्तर्हि, भावध्वनेरुदाहरणम्, न तु भावाभासस्य।[33]

**( 2 ) गुरुपत्नीं प्रति भाववर्णनम्**-अच्युतराजः अनुचितविषयां (गुरुपत्नीगताम्) स्मृतिं रसाभासम् अङ्गीकृतवान्-

**रोहिण्यादिषु सर्वासु सतीषु रमणीष्वपि।**
**चन्द्रस्तारात्वमारोप्य रमन्पुष्टोऽन्यथा क्षयी॥**[34]

अत्र चन्द्रस्य स्वभार्यातिरिक्तानामन्यानां स्त्रीणां स्मरणमनुचितम्। अपि च अत्र देवगुरोः बृहस्पतेः भार्यायाः तारायाश्चापि स्मरणं व्यज्यते। अतः गुरुपत्नीगतैषा स्मृतिः अनुचितविषयत्वेन भावाभासस्य विषयः।[35]

एवमेव योगिनी-तपस्विनी-नृपपत्नी-पुत्रवधू-भ्रातृपत्नीगत-भाववर्णनेऽपि भावाभासो बोद्धव्यः।। यथा-

**कौरवः कलयन्नेव कृष्णानयनखञ्जनौ।**
**निधनं गामितो येन कृष्णः पुष्णातु मामसौ॥**[36]

अत्र दुर्योधनः मातृतुल्यायाः (भ्रातृजायायाः) पाण्डवपत्न्याः नेत्रे स्मरन् वर्णितः। तस्येयं स्मृतिः अनुचितालम्बनत्वेन, द्रौपदीविषयत्वेन भावाभासस्य उदाहरणम्। अत्र भावाभासः कवेः कृष्णरतेरङ्गत्वेन वर्णितः[37] न त्वङ्गित्वेन।

**( ख ) परपत्नीगतभाववर्णनम्**-लोके शास्त्रादिषु च परदाराभिमर्शो भृशं निन्दितो वर्तते।[38] अतः काव्यादिषु अपि एवंविधं लोकाचारशास्त्रविरुद्धं वर्णनं पाठकहृदयेषु अनौचित्यजनकत्वात् भावाभासत्वम्। तेनैव अलङ्कारसर्वस्व-विमर्शिनीटीकायाः कर्त्ता जयरथः परभार्याविषयं 'औत्सुक्यवर्णनं' रसाभासं स्वीचकार-

**द्विषां तवारण्यनिवासमीयुषां नितम्बिनीनां निकुरम्बकं नृप।**
**मुहुर्मुहुस्त्र्यस्त्रवलद्विलोचनं न केन पल्लीपतिना निरीक्षितम्॥**[39]

अत्र शबराणां परदाराविषयमौत्सुक्यम् अनौचित्येन प्रवृत्तम्, अतः भावाभासस्य इदमुदाहरणम्। भावाभासश्चात्र राजविषयां रतिं प्रत्यङ्गम्।[40]

एवमेव परपतिविषयकभाववर्णनेषु अपि शास्त्रदृष्ट्या भावाभासः स्वीकरणीयः।



**3. अननुरक्तां प्रति भावप्रदर्शनम्**-अननुरक्तां प्रति व्यक्तः प्रेमभावः सहृदयमनसि अनौचित्यं प्रकटयति। आचार्यमम्मटः अधोलिखितं पद्यं भावाभासस्योदाहरणत्वेन समुद्धृतवान्-

**राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी।**
**तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः॥**[41]

सीतामुद्दिश्य रावणस्योक्तिरियम्।[42] अत्र रावणस्य सीताविषयिणी चिन्ता अनौचित्यप्रवर्त्तिता इति भावाभासः। काव्यप्रकाशस्य टीकाकारवामनझलकीकरानुसारं प्रथमं स्त्रियो रागः तत् पश्चात् स्त्रियाः इङ्गितैः पुरुषस्य रागो वर्णनीयः, इति नियमः परन्तु एतद्विरुद्धमत्र अननुरक्तां सीतां प्रति रावणस्य अनुरागः वर्णितः। अतः अत्र चिन्ताख्यस्य व्याभिचारिभावस्य प्रदर्शनमनौचित्यपूर्णम्।[43] अस्मन्मते तु अत्र अनुचितालम्बनं प्रति भावप्रदर्शनमेव अनौचित्यस्य कारणम्, न तु "आदौ वाच्यः स्त्रिया रागः पश्चात् पुंसस्तदिङ्गितैः' इति नियमभङ्गः। रावणस्य चिन्ताऽत्र मर्यादापुरुषोत्तमस्य रामस्य पत्नीं जगद्वन्द्यां सीताम् अभिलक्ष्य अभिव्यक्ताऽस्ति। सीता रावणं भृशम् उपेक्षते। पाठकेभ्योऽपि सीतया सह रावणस्य प्रीतिरकाम्या एव तस्मात् ते (पाठकाः) रावणस्य चिन्तया तादात्म्यं नैवानुभवन्ति। तस्मात् भावाभासस्येदं उदाहरणम्। पुरुषस्य प्रथमानुरागश्चेत् उचितालम्बनं प्रति भवेत् तर्हि पाठकस्तत्र रसम् उत वा भावमेव अनुभवति। कालिदासविरचिते अभिज्ञानशाकुन्तले तपोवने वृक्षान् सिञ्चन्तीं शकुन्तलां वीक्ष्य राजा दुष्यन्त एव प्रथमं यत् शकुन्तलाम् अभिलषति[44] न च तत् पाठकान् उद्वेजयति।

आचार्यहेमचन्द्रोऽपि सीतादर्शनव्याकुलस्य रावणस्य औत्सुक्यम् 'अनुचितालम्बनं प्रति भावप्रदर्शनस्य दृष्टान्तत्वेन उद्धृतवान्।[45] यत्र सीतायाः रूपमाधुर्ये आसक्तो रावणः तां द्रष्टुं नितरां व्याकुलताम् अनुभवति। सीता च तं प्रति जुगुप्साभावयुक्ता अस्ति। तेन सहृदयः पाठकः रावणस्यौत्सुक्यभावेन तादात्म्यं स्थापयितुम् असमर्थो भवति। शास्त्रीयदृष्ट्या रावणस्य सीतां प्रति औत्सुक्यं सीतारूपानुचितालम्बनगतत्वेन अनौचित्यप्रवर्त्तितत्वाद् भावाभासः।[46]

विद्याधरेणापि अननुरक्तां सीतां प्रति प्रकटितं रावणस्यौत्सुक्यम् अनौचित्य-प्रवृत्तत्वाद् भावाभासोऽङ्गीकृतः।[47]

**4. स्वभावप्रतिकूलभाववर्णनम्-** आचार्यः विश्वनाथो वेश्यादिषु लज्जादिवर्णने भावाभासोऽङ्गीचकार।[48] कारणमत्र स्पष्टम्। वेश्या स्वभावेनैव निर्लज्जा भवति। सा स्वीयैर्लज्जाविरहितैर्व्यवहारैः पुरुषान् आकर्षयति। सा न कमपि रज्यति न च द्वेष्टि।[49] अत्रैतत् समवधारणीयं भवति यत् वेश्यायाः छलकपटस्वार्थादिरहिते तु लज्जादिवर्णने भाव एव स्वीकरणीयः न तु भावाभासः। यथा शूद्रकस्य मृच्छकटिके गणिकायाः वसन्तसेनायाः चारुदत्तं प्रति अनुरागः शृङ्गारः, एव न तु शृङ्गाराभासः। एवमेव बालस्य स्त्रीविषयिणी कामना, वृद्धायाश्च पुरुषविषयिणी कामना प्रकृतिविरुद्धत्वात् भावाभासस्य उदाहरणम्।

**5. अधमपात्रगतं भाववर्णनम्-** आचार्यशिङ्गभूपालः अधमपात्रगतं व्यभिचारिभाववर्णनं भावाभासं स्वीकरोति। तन्मतानुसारं अधमपात्राणां भावप्रदर्शनायोग्यत्वात्, तेषां निद्रादिभाववर्णनम् अनुचितम्-

**अयोग्यकृतं प्रोक्तं नीचतिर्यङ्नराश्रयम्।**[51]

अस्य उदाहरणरूपेण तेन यत् पद्यमुद्धृतम्, तस्मिन् अधमपात्रस्य निद्रायाः वर्णनमस्ति। नीचगतं निद्रावर्णनं पाठकेभ्यः नातिस्वदतेऽतः भावाभासोऽयम्।[51]

**6. पशुपक्षिगतभाववर्णनम्-** पशुपक्षिषु मानवीयभावानां प्रकटनक्षमता न भवति। अतः तेषु वर्णितभावानाम् अनौचित्याद् हेमचन्द्र-शिङ्गभूपाल-नरेन्द्रप्रमसूरिभिः पशुपक्षिणाम् भाववर्णने भावाभासः स्वीकृतः।[52]

शिङ्गभूपालोऽधोगतोदाहरणे नीचपक्षिगतभाववर्णनत्वात् भावाभासं स्वीकरोति-

**वेलातटे प्रसूयेथा मा भूः शङ्कितमानसा।**
**मां जानाति समुद्रोऽयं टिट्टिभं साहसप्रियम्॥**[53]

अत्र यदि समुद्रतटे सन्ततिं प्रसूये तर्हि उद्वेलकल्लोलमालादिभिर्ममापत्यानि हृतानि भवेयुरिति शङ्कितायां निजगृहिण्यां कश्चिद् टिट्टिभः पक्षिविशेषो गर्वायते। तदयं गर्वो नीचतिर्यग्गतत्वादाभासो नातीव स्वदते।।[54]

शिङ्गभूपालः स्पष्टतया केवलं नीचतिर्यग्गतभाववर्णन एव अनौचित्यं स्वीकरोति तेन उत्तमतिर्यग्गतभाववर्णने कदाचित् स भावमेव स्वीकरोति इति अस्मन्मतम्।

**7. निरिन्द्रियगतं भाववर्णनम्-** हेमचन्द्रशिङ्गभूपाल-नरेन्द्रप्रमसूरि-



प्रभृतिभिराचार्यैर्निरिन्द्रियगतभाववर्णनं भावाभास इति स्वीकृतम्। मेघ-पवन-वृक्ष-लतादयः जडपदार्थाः चित्तविकारशून्या भवन्ति। एतेषु भावग्रहणप्रदर्शनादियोग्यतानां सर्वथा अभावो भवति। अत एतेषु मानवीयभावानामारोपः सर्वथा असत्यत्वात् अनुचितः।[55] यथा-

**गुरुगर्भभरक्लान्ताः स्तन्यन्तो मेघपङ्क्तयः।**
**अचलाधित्यकोत्सङ्गमिमाः समधिशेरते॥**[56]

अत्रालस्याख्यव्यभिचारिभावस्य वर्णनम् अचेतनमेघविषयत्वाद् भावाभासः। मेघपङ्क्तेर्गर्भधारणं तज्जन्यम् आलस्यादिकं च तस्य कार्यम्। एवंविधेषु प्रसङ्गेषु सहृदयः पाठको भावं नातिस्वदते, अतः भावाभास एव।

## भावाभासस्य अलङ्कारेषु अन्तर्भावः

अलङ्कारवादी आचार्य उद्भटः अनौचित्यप्रवृत्तं भावनिरूपणम् ऊर्जस्वि नाम अलङ्कारं स्वीकरोति।[57] ततः तन्मतानुयायी रुय्यकः भावाभासं 'ऊर्जस्वि' इति अभिहितवान्।[58]

रसध्वनिवादिभिः आचार्यैः अलङ्कारवादिनाम् उपर्युक्तमतविरुद्धम् अङ्गरूपभावाभासस्य वर्णनम् एव 'ऊर्जस्वि' अभिमतम्,[59] एतद्विरुद्धं अलङ्कारवादिभिः अङ्गीभूतः भावाभासः 'ऊर्जस्वि' स्वीकृतः।

आचार्यहेमचन्द्रः समासोक्ति-अर्थान्तरन्यास-उत्प्रेक्षा-रूपक-उपमा-श्लेषादि-अलङ्कारान् रसाभासभावाभासयोर्जीवितं मन्यते।[60]

रसाभासभावाभासयोः उत्पत्तौ सहायकत्वात् एते अलङ्काराः अलङ्कारवादिभिः एतयोर्जीवितमिति स्वीकृतम्। वस्तुतः समासोक्त्यादिषु अलङ्कारेषु प्रस्तुतेऽप्रस्तुतारोपो भवति। प्रस्तुते अप्रस्तुतारोपेण एकतः समासोक्तिः अलङ्कारः सिद्ध्यति, अपरतः निरिन्द्रियेषु तिर्यगादिषु च मानवीयभावनारोपात् रसाभासभावाभासौ जायेते। उदाहरणतः **अन्यासु तावदुपमर्दसहासु भृङ्गलोलं विनोदय मनः सुमनोलताम्। मुग्धामजातरजसां कलिकामकाले व्यर्थं कदर्थयसि किं नवमालिकायाः॥**[61]

अल्पवयस्कां कुमारीं प्रति आसक्तं कमपि कामुकम् अभिलक्ष्य कस्यापि उक्तिरियम्-भो भ्रमर! उपमर्दसहनयोग्यासु अन्यपुष्पलतासु (प्राप्तयौवनासु नारीषु)

स्वमनः विनोदय मुग्धाम् अल्पवयस्कां परागशून्यां नवमालिका-कलिकां (अल्पवयस्कां अनारम्भरजोदर्शनां मुग्धां कन्याम्) असमये व्यर्थं मा कदर्थय। अत्र भ्रमरकामुकयोः समानाचरणस्य (कार्यस्य) वर्णनमस्ति, अतः समासोक्तेः अलङ्कारस्योदाहरणम्, अपि च तिर्यग्भ्रमरे चपलतायाः प्रदर्शनं भावाभासोऽमपि।

## निष्कर्ष

संस्कृताचार्यैः प्रस्तुतायाः भावाभासविषयकसामग्र्या अनुशीलनानन्तरं भावाभासविषये निष्कर्षतः निम्नलिखितानि तथ्यानि प्रस्तोतुं शक्यन्ते–

1. सर्वैः अपि आचार्यैः अनौचित्यमेव भावाभासस्य आधारः स्वीकृतः।

2. मम्मटं जयदेवं च विहाय सर्वैरपि आचार्यैः भावाभासस्य विवेचनप्रसङ्गे प्राधान्येन व्यञ्जितस्य व्यभिचारिभावस्य अनौचित्यप्रवर्त्तनम् एव स्पष्टीकृतम्।

3. अपरिपुष्टस्य स्थायिनः अनौचित्यं न केनापि आचार्येण वर्णितम्।

4. मम्मटेन शत्रुणा विहितायाः स्तुतौ भावाभासः अभिमतः।

5. जयदेवेन भक्तस्य अनेकदेवताविषयिणी रतिः भावाभासः कथितः।

6. केषुचित् प्रसङ्गेषु व्यभिचारिभावस्य अनौचित्यं स्वीकृतं पूर्वाचार्यैः।

7. अलङ्कारवादिभिराचार्यैः ऊर्जस्विनि अलङ्कारे भावाभासोऽन्तर्भावितः।

8. हेमचन्द्रः समासोक्त्यादीन् अलङ्कारान् भावाभासस्य जीवितं स्वीकृतवान्।

9. भावाभासोऽपि रसादिध्वनेः (उत्तमकाव्यस्य) एव प्रकारोऽस्ति इति आनन्दवर्धनः मम्मटश्च।

10. भावाभासः आस्वादनीयः वर्तते इति विश्वनाथः।

11. रसाभासस्य इव भावाभासगतानौचित्यस्य आधारोऽपि लोकः शास्त्रञ्च वर्त्तेते।

12. भावाभासकाव्येषु साधारणीकरणस्य दशा अनुभूतेः प्रक्रिया च रसाभासकाव्येन सदृशे भवतः।।

## भावाभासस्य काव्ये उपादेयत्वं अनिवार्यत्वं च

काव्यादिषु भावाभासस्य प्रयोजनत्रयमस्ति–

1. **प्रथमम्**–व्यक्तौ, समाजे अथवा राष्ट्रे व्याप्तानां कुप्रवृत्तीनाम् अनाचाराणां



त्रुटीनाम् उत्पाटनाय भावाभासस्य वर्णनम् अनिवार्यं भवति। उदाहरणतः–कश्चन कविः समाजे भ्रष्टराजनेतृणां शोषणेन, धूर्ततया, वञ्चनया, कदाचारेण वा जनान् जागरयितुं काव्यं करोति चेत् तर्हि सः स्वकाव्ये भ्रष्टनेतृभिः लोकगर्हितं शास्त्रविरुद्धञ्च कार्यं कारयिष्यति येन भावाभासस्य (रसाभासस्य वा) उपस्थितिः स्वत एव भविष्यति।[62]

2. **द्वितीयम्**–दुष्टपात्रं प्रति सहृदयपाठकानां मनसि जुगुप्सा–क्षोभो–पेक्षादिभावान् जागरयितुमपि कवयः सोद्देश्यं भावाभासकाव्यं रचयन्ति। यथा–रावणं कंसं वा प्रति पाठकमनसि जुगुप्साक्षोभादिभावान् पोषयितुं कवयः रावणादिभिः अधिकाधिकं अनुचितकार्यं कारयिष्यन्ति येन पाठकमनसि रावणादिकं प्रति काव्यकाराभीष्टः जुगुप्सादिभावः जागरितः स्यात्। एतेन काव्ये भावाभासस्य महत्त्वं उपदेयत्वं च सिद्ध्यति।

3. **तृतीयम्**–समाजे व्यक्तिचरित्रे वा सदा उच्चादर्शपूर्णं दोषशून्यं वा सर्वं न भवति। अस्माकं समाजः व्यक्तिचरित्रञ्च प्राधान्येन बहुविधावगुणैः व्याप्तं वर्तते। समाजे व्यक्तिचरित्रे वा यथा आदर्शपेक्षया अनादर्शस्य बाहुल्यं दृश्यते तथैव काव्यादिषु अपि औचित्यमूलरसभावापेक्षाया अनौचित्यमूलयोः रसाभासभावा–भासयोः विषयक्षेत्रं विपुलतरं विद्यते। औचित्यानौचित्ययोः सन्तुलितवर्णनेन एव कुशलः कविः उत्तमं काव्यं रचयति। आदर्शानादर्शयोः, गुणदोषयोः सदाचार–कदाचारयोः, नायकप्रतिनायकयोः संघर्षवर्णनेन काव्यनाट्यादिकम् अधिकं रुचिकरं ग्राह्यं च भवति। तथा च अनादर्शदोषकदाचारप्रतिनायकादिवर्णनम् अनौचित्यमूलत्वेन भावाभासं रसाभासं वा जनयति।

वस्तुतः रसाभासस्य भावाभासस्य च कल्पनायां भारतीयाचार्याणाम् आदर्शवाद–यथार्थवादयोः द्वयोरपि समन्वयः दृश्यते। अनैतिकं सामाजिकवर्जनायुक्तं काव्यं रसाभासं भावाभासं वा स्वीकृत्य एकतः एतैराचार्यैः साहित्ये आदर्शवादस्य समर्थनं कृत्वा तस्य आवश्यकता प्रमाणीकृता, अपरतः रसाभासभावाभासयोः रसपरिवारे परिगणनां विधाय, तयोः उत्तमकाव्यत्वं स्वीकृत्य एतदपि सङ्केतितं यत् काव्यकारः कस्यापि आदर्शस्य नीतेः वा पालनाय बाध्यो नास्ति इति। काव्यजगतः स स्वयमेव प्रजापतिरस्ति, यथारुचि काव्यरचनाय स सर्वथा स्वतन्त्रः। व्यक्तेः समाजस्य वा

दोषान् यथावत् चित्रयितुं स सदाचारहीनं, लोकशास्त्रादिगर्हितम् अपि तथ्यं स्वरचनायां वर्णयति, वर्णनीयमपि एतत्, तेनैव साहित्यं समाजस्य सत्यं दर्पणं भवितुमर्हति। एवं काव्ये भावाभासस्य (रसाभासस्य च) महत्त्वं उपादेयत्वं अनिवार्यत्वञ्च सिद्धं भवति।

❖

## सन्दर्भग्रन्थाः

1. ध्वन्यालोकः, प्रथम उद्द्योतः, पृ.79-80, चौखम्बा विद्याभवन,वाराणसी।
2. काव्यप्रकाशः, 4/36
3. अलङ्कारसर्वस्वम्, सू.83 वृत्तिभागः।
4. काव्यानुशासनम् 2/54, पृ.120, निर्णयसागर प्रेस, मुम्बई, 1934 ई.
5. तदेव, 2/55
6. तदेव, 2/55, वृत्तिभागे
7. चन्द्रालोकः, 6/19
8. साहित्यदर्पणम्, 3/262
9. रसार्णवसुधाकरः, 2/98
10. कुवलयानन्दः, 171
11. रसगङ्गाधरः, प्रथमाननम्, पृ.357 (काशी हिन्दू विश्वविद्यालयः, वि.सं.2020)



12. साहित्यसारः, 4/176
13. (क) रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः।

काव्यप्रकाश 4/35-36

(ख) सञ्चारिणः प्रधानानि देवदिविषया रतिः।

उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते।। साहित्यदर्पणम्, 3/260-61

(ग) द्रष्टव्यम् - रसगङ्गाधरः (बद्रीनाथकृतचन्द्रिकाख्यव्याख्यासहितः), चौखम्बा विद्याभवन, वाराणसी, 1970 ई., पृ.283, 86, 296

14. (क) काव्यप्रकाशः, वामनी टीका, पृ.118

(ख) रसगङ्गाधरः, चन्द्रिकारव्यासंस्कृतव्याख्या, चौखम्बा विद्याभवन, वाराणसी, 1970 ई. पृ.296

15. आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया। काव्यप्रकाशः, 4/35-36वृत्तिभागः
16. द्रष्टव्यम्- (क) भगवद्भक्तिरसामृतसिन्धुः।

(ख) उज्ज्वलनीलमणिः।

(ग) भगवद्भक्तिरसायनम्।

17. साहित्यदर्पणम्, 3/251-254
18. (क) काव्यप्रकाशः, 4/31-34 (ख) साहित्यदर्पणम्, 3/141
19. साहित्यदर्पणम्, 3/175
20. (क) साहित्यदर्पणम्, 3/251

(ख) विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
स्वाद्यत्वं हृदि भक्तानामानीताः श्रवणादिभिः।
एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत्।।
भक्तिरसामृतसिन्धुः, दक्षिणविभागः, विभावलहरी, 5/6

21. स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे....अत्रानेककामुकविषयमभिलाषं तस्याः 'स्तुमः' इत्याद्यनुगतं बहुव्यापारोपदानं व्यनक्ति। का.प्रकाशः,4/48 वृत्तिभागः।
22. '..... एवमेकस्यानेकदेवतादिविषयकरत्यादिवर्णनया रतिकथने भावाभास इत्यर्थः।' चन्द्रालोक, 6/19 'राकागम' संस्कृतटीका
23. तदेव, 6/19
24. एवं गुर्वादिविषयाण्यूह्यानि, तदेव, 6/19 'राकागम' संस्कृतटीका।

25. काव्यप्रकाशः, 5/119

26. '..... मुनिगुरुपत्नीगतायां च।।' साहित्यदर्पणम्, 3/263

27. रसगङ्गाधरः, प्रथमाननम्, रसाभासप्रकरणम्, पृ.347,353 (काशी हिन्दू विश्वविद्यालयः, वि.सं.2020)

28. साहित्यसारः, 4/177

29. रुद्राटाचार्येण अगम्याः स्त्रियः एवं सूचीबद्धाः-

सम्बन्धिमित्रद्विजराजतीक्ष्णवर्णाधिकानां प्रमदा न गम्याः।

व्यङ्ग्यास्तथा प्रव्रजिता विभिन्नमन्त्राश्च धर्मार्थमनोभवज्ञैः।।

शृङ्गारतिलकम् 1/35

30. रसगङ्गाधरः,प्रथमाननम्,भावप्रकरणम्,पृ.357(का.हि.वि.,वा.वि.सं.2020)

31. तदेव, पृ.357

32. एषा चानुचितविषयकत्वादनुभयनिष्ठत्वाच्च भावाभासः। तदेव, पृ.358

33. यदि पुनरियं तत्परिणेतुरेवोक्तिः तदा भावध्वनिरेव।। तदेव, पृ.358

34. साहित्यसारः, 4/178

35. सर्वेत्यादिपदत्रयेण तासां यावत्स्त्रीगुणयुक्तत्वेन नायकस्यान्यस्त्रीस्मरणानौचित्यं द्योत्यते। एवं चात्र ताराख्यगुरुसुन्दरीस्मरणमेव हेत्वलङ्कारादिभ्यः प्राधान्येन ध्वनितम्। तस्य चानुचितविषयत्वेन भावाभासत्वं तेनात्र क्षयीति पदसूचितं नायकस्य महापातकित्वेन राजयक्ष्माशालित्वं व्यज्यते। साहित्यसारः, 4/178, सरसामोदाख्या संस्कृतव्याख्या।

36. तदेव, 5/19, सरसामोदाख्या संस्कृतव्याख्या।

37. अत्र भगवद्रत्याख्यभावे द्रौपद्याः पाण्डवपत्नीत्वेन मातृप्रायत्वात् दुर्योधननिष्ठतन्नेत्रस्मृतिरूपभावस्यानुचितविषयत्वेनाभासत्वात् स तावद् अमुख्यत्वादङ्गमेव। साहित्यसारः, 5/19 वृत्तिभागः।

38. परदाराभिमर्शेषु प्रवृत्तान् नृन्महीपतिः।

उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्।। मनुस्मृतिः, 8/352

39. अलङ्कारसर्वस्वम्, सू.83 (विमर्शिनी टीका)।

40. अत्र शबराणां परदाराविषयमौत्सुक्यमनौचित्येन प्रवृत्तमिति भावाभासो राजविषयां रतिं प्रत्यङ्गम्। तदेव, 83 सूत्रान्तर्गता विमर्शिनी टीका।

41. काव्यप्रकाशः, 4/36 (उदाहरणम्)।



42. तदेव, वामनी टीका, पृ.121

43. अत्र चिन्ता अनौचित्यप्रवर्तिता। तदेव, 3/36 सूत्रान्तर्गतम्।

44. अभिज्ञानशाकुन्तलम्, प्रथमोऽङ्कः।

45. निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी,

कान्तिः प्रावरणं तनोर्मधुमुचो यस्याश्च वाचः किल।

विंशत्या रचिताञ्जलिः करतलैस्त्वां याचते रावण-

स्तां द्रष्टुं जनकात्मजां हृदय हे नेत्राणि मित्रीकुरु।।

काव्यानुशासनम्, 2/55

46. अत्रौत्सुक्यम्, तदेव, 2/55 उदाहरणे वृत्तिः।

47. द्रष्टव्यम्-अस्मद्विक्रमचेष्टितान्यखिलसत्रैलोक्यहेलाजय...।। एकावली, पृ.107 (तत्त्वविवेचक प्रेस, बम्बई, सन् 1903)

48. भावाभासो लज्जादिके तु वेश्यादिविषये स्यात्।। साहित्यदर्प.,3/266

49. .... वेश्या सामान्यनायिका निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।

वित्तमात्रं समालोक्य स रागं दर्शयेद् बहिः।। तदेव, 3/67-68

50. रसार्णवसुधाकरः, 2/99

51. "अत्र नीचगता निद्रा भावकेभ्यो नातिस्वदते।। तदेव, पृ.85

52. अयोग्यकृतं प्रोक्तं नीचतिर्यङ्नराश्रयम् ....। तदेव, 2/99

53. तदेव, पृ.85

54. तदेव, पृ.85

55. असत्यत्वादयोग्यत्वादनौचित्यं द्विधा भवेत्।

असत्यत्वकृतं तत् स्यादचेतनगतं तु यत्।। रसार्णवसुधाकरः, 2/99

विशेषविवरणार्थं द्रष्टव्यम्, लेखकस्य 'रसाभास और भावाभासा'ख्यग्रन्थस्य निरिन्द्रियगतरतिप्रकरणम्, पृ.206 (ईस्टर्न बुक लिंकर्स, दिल्ली, सन् 1997)

56. (क) काव्यानुशासनम्, पृ.121 (निर्णयसागरप्रेस, बम्बई, सन् 1934)

(ख) अलङ्कारमहोदधिः पृ.96 (ओरियण्टल इन्स्टीच्यूट, बड़ौदा, 1942)

57. अनौचित्यप्रवृत्तानां क्रामक्रोधादिकारणात्।

भावनां च रसानां च बन्ध ऊर्जस्वि कथ्यते।।

काव्यालङ्कारसङ्ग्रहः,4/5

58. रसभावतदाभासतत्प्रशमानां निबन्धनेन रसवत्-प्रेय-ऊर्जस्वि-समाहितानि।

अलङ्कारसर्वस्वम्, सूत्र 83

59. (क) प्रधानेऽन्यत्र वाक्यार्थे यथाङ्गं तु रसादयः।

काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।। ध्वन्यालोकः, 2/5

(ख) रसभावौ तदाभासौ भावस्य प्रशमस्तथा।

गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा।।

रसवत् प्रेय ऊर्जस्विसमाहितमिति क्रमात्।। साहि.द.,10/95-96

60. रसाभावस्य भावाभासस्य च समासोत्त्यर्थान्तरन्यासोत्प्रेक्षा-रूपकोपमाश्लेषादयो जीवितम्।। काव्यानुशासनम्, 2/55 सूत्रान्गतर्गतम्।

61. साहित्यदर्पणम्, 3/169 (उदाहारणम्)

62. In poetry of Rasa, Auchitya is the very life, Jivita, but in comic writing the very life of its Rasa i.e. Rasa, Rasabhasa or Hasya Rasa is Anauchitya. Anauchitya is the secret of comic writing we can well say. -some concepts of alankarshastra History of Auchitya in Sanskrit Poetics. - V. Raghvan.p.278

❖



# नयागडमण्डले संस्कृतधारायाः परम्परा

डा. जगमोहन आचार्य

**उपक्रमः**

भाषा भावविनिमयस्य चिन्ताभावनायाः आदानप्रदानयोः माध्यमम्। सङ्केतद्वारा यद्यपि भावविनिमयः भवति किन्तु भाषा हृत् स्पृशति। तदर्थं भाषायां लिपिबद्धं साहित्यम् अलौकिकमेव। साहित्यद्वारा भाषायाः तथा भाषाद्वारा साहित्यस्य प्रचारप्रसारो भवति। भाषासाहित्ययोः मध्ये परस्परानुगत्यं सदैवास्ति। संस्कृतभाषा सरला मधुरा चास्ति। उच्चारणवैषम्यं विहाय संस्कृतभाषायाः प्रयोगे समानतास्ति। क्रान्तद्रष्टारः कवयः अन्तःस्फुरितशब्दसंयोजनं कृत्वा अलौकिकापौरुषेयस्य वैदिकसाहित्यस्य धाराः प्लावितवन्तः। सा चिरप्रवहमाना धारा कालानुमोदनेन आधुनिकसमयेऽपि साहित्यम् उज्जीवयति। उत्कले संस्कृतभाषासाहित्यस्य धारायाः परम्परा पुरातनी। प्रचीनसाहित्यादारंभ्याद्यावधि मौलिकरचानायाम् उत्कलस्य इदानीम् 'ओडिशा' इत्याख्यस्य वा प्रान्तस्य स्थानं वैशिष्ट्यमाधत्ते। तत्र च नयागडनवदुर्गेति मण्डले संस्कृतगङ्गायाः धारा प्रवहमाना प्रागेव। अधुनापि नयागडमण्डलस्य विद्वांसः प्रान्ते देशे देशान्तरे च सुपरिचिताः प्रतिष्ठिताश्च। नयागड-खण्डपडा-दशपल्ला-रणपुरेति नाम्ना गडजातानि नवदुर्गशासकैः शासितानि आसन्। शासकानां स्वकार्येण सह साहित्यचर्चासमये संस्कृतसाहित्यस्य चर्चा स्पष्टतः लक्ष्यते। मौलिकरचनायाम्, गवेषणायाम् तथा प्रचारप्रसारदृष्ट्या नयागडस्य स्थानं स्वतन्त्रमेव। अधुनातनसमये समयस्य समानतां नीत्वा नयागडस्य कवयः काव्यधारां वाहयन्ति।

**नित्यानन्दः**

कौण्डिन्यगोत्रस्य अष्टादशशतकस्य कविः नित्यानन्दः। नयागडगडजातस्य

गदाधरमान्धातेति शासकस्य कविः नित्यानन्दः। सः खण्डपडागडे आसीत्। जयदेवस्य गीतगोविन्दाधारेण सः लिखति 'श्रीकृष्णलीलामृतमहाकाव्यम्'। तस्यापराकृतिर्भवति शिवलीलामृतमहाकाव्यं तथा च 'नीलाद्रिनाथशतकम्'।

## सामन्तचन्द्रशेखरः

खण्डपडागडस्य ज्योतिर्विज्ञानविशारदः महामहोपाध्यायः चन्द्रशेखरसिंहहरिचन्दनमहापात्रसामन्तः विश्वविख्यातः। पौषकृष्णाष्टम्यां तिथौ ऊनविंशशतकस्यादिभागे। (13.12.1835) जातोऽसौ पठाणिसामन्तनाम्ना परिचितः। 'सिद्धान्तदर्पणः' तस्य कृतिः। श्रीजगन्नाथस्य भक्तः पठाणिसामन्तः पञ्चशताधिकद्विसहस्रैः श्लोकैः सिद्धान्तदर्पणस्य ग्रन्थस्य रचनां कृतवान्। महामहोपाध्यायेत्युपाधिना ब्रिटिशसर्वकारेण सः भूषितः। सिद्धान्तदर्पणः न केवलं ज्योतिर्विज्ञानं तथा च गाणितिकचिन्तनस्य परिप्रकाशः अपितु तत्र साहित्यम् अपि दृश्यते। अधुनातनसमये चन्द्रशेखरकृतपञ्जिकां तस्य वंशजाः प्रचालयन्ति एवं च धर्मे आस्थापोषकाः स्वगृहे सामन्तपञ्जिकां नीत्वा दिनचर्यां पश्यन्ति।

## चन्दशेखरमिश्रः

पण्डितचन्द्रशेखरमिश्रः खण्डपडागडे ऊनविंशशतकस्य चतुर्थपादे जातः। संस्कृतशिक्षकरूपेण कार्यं कृतवान्। तस्य काव्यकृतिः 'आर्तत्राणनारायणशतकम्' इति। भगवतः नारायणस्य प्रीत्यर्थे रचितमिदं शतकम्। 'जगन्नाथशतकम्' इति तस्य अन्यमेकं शतककाव्यम्। अपरा कृतिः नीतिदर्पणः तथा ब्रिटिशशासकस्य वंशानुचरितं नीत्वा चन्द्रशेखरस्य लेखः ब्रिटिशराजवंशम् इति।

## वनमाली आचार्यः

खण्डपडागडस्याधुनिकपण्डितानामग्रगण्यः वनमाली आचार्यः। संस्कृतभाषायां काव्यरचना तस्यैव प्रवृत्तिः। खण्डपडागडस्य पुरातनोच्चविद्यालयस्य रामचन्द्रोच्चविद्यालयस्य पण्डितरूपेण कार्यं कृतवान्। पुरीस्थे सदाशिवपरिसरे अध्यापनार्थं सः मनोनीतः परन्तु खण्डपडागडस्य राज्ञः आग्रहेण खण्डपडायां पण्डितरूपेण स्वप्रतिभां प्रकाशितवान्।

## कृष्णचन्द्र आचार्यः

आचार्यवंशजाः अधुनापि संस्कृतसाहित्यस्य सेवकाः। वनमाली आचार्यस्य



सुपुत्रः कृष्णचन्द्र आचार्यः। उत्कलविश्वविद्यालयतः श्रीजगन्नाथसंस्कृतविश्वविद्यालयं यावत् तस्य कार्यक्षेत्रमासीत् किन्तु प्रतिभायां सः विश्वप्रसिद्धः। सः वेदव्याकरणविशारदः। प्राकृतव्याकरणोपरि तस्य विशेषाध्ययनमासीत्। तेन अथर्ववेदस्य पैप्पलादशाखामाधारीकृत्य कार्यं कृतम्। श्रीजगन्नाथसंस्कृतविद्यालयस्य कुलपतिपदं तेनालङ्कृतम् आसीत्।

कृष्णचन्द्राचार्यस्य पुत्री विजयलक्ष्मीः संस्कृताध्यापिका गवेषिका च।

## सत्यनारायण आचार्यः

आचार्यवंशजः खण्डपडासन्निकटनटवरपुरशासने आचार्यसत्यनारायणः जन्मग्रहणं कृतवान्। सत्यनारायण आचार्यः साहित्यचर्चायां सुपरिचितः। माधवक्षेत्रोत्पन्नः सत्यनारायणः श्रीक्षेत्रतः गोविन्दाचलं यावत् संस्कृतसेवायां निरतः। संस्कृतभाषायाः प्रचारप्रसारगवेषणा एवं च मौलिकरचनाद्वारा संस्कृतसाहित्यस्य श्रियं वर्धयति सत्यनारायणः।

लोकभाषाप्रचारसमितिः, प्रियवाक्यपरिषद्, ओडिशासंस्कृतएकादेमी, संस्कृतभारती इत्यादिसंस्थामाध्यमेन संस्कृतसेवायां नितरां कार्यतोऽयं बहुभिः पुरस्कारैः मण्डितः। मध्यप्रदेशसंस्कृतअकादेमीतः नवोदितप्रतिभापुरस्कारः तथा च अभिनवनाट्याचार्योपाधिः, मयूरभञ्जसंस्कृतशिक्षकसंघओडिशातः प्रज्ञाप्रभोपाधिः, विश्वकल्याणफाउण्डेशन नवद्वीपबङ्गतः अपि संवर्धितः। एषः संस्कृतपत्रिकासंपादनेऽपि दक्षः। चतुर्दशाधिकानां संस्कृतपत्रिकानां संपादनकार्ये महोदयः संश्लिष्टः, तद्यथा प्रियंवदा, प्रियवाक्, संस्कृतमन्दाकिनी, पौर्णमासी, सन्दर्भसम्भारः, श्रीसदाशिवम्, साहित्यसौरभम्, हिमांशुश्रीः, प्रथमप्रवेशिका, मध्यमप्रवेशिका, लोकप्रज्ञा, बुधरञ्जनी, संस्कृतशिक्षा संस्कृतनिबन्धमाला आदि। तस्य कृतयः भवन्ति ध्वन्यालोके काव्यसंपदः, संस्कृतं वदतु, शेषसंध्या, संस्कृतशोधप्रविधिः, विज्ञानयुगे संस्कृतसाहित्यस्य भूमिका, संस्कृतकाव्यसामग्री, मम संस्कृतशोधपत्रिका, साहित्यादर्शः, ध्वन्यालोकलोचनव्याख्यानभूताया अञ्जनटीकायाः समीक्षात्मकं सम्पादनम्, दशरूपकम् आदि।

## भुवनेश्वरकरः

नयागडमण्डलस्य ओडगाँग्रामान्तर्गतस्य बाउँशगाडिआ इति ग्रामे विंशशतकस्याद्याचरणे (1925) भुवनेश्वरकरपादस्य जन्म। रणुपरगडस्थे उच्चविद्यालये

संस्कृतशिक्षकरूपेण संस्कृतस्य सेवारम्भं कृत्वा तदनन्तरं बालेश्वर-पुरी-सम्बलपुरादिस्थाने अध्यापकस्य कार्यं कृतवानयं गङ्गाधरमेहेरमहाविद्यालयतः प्राध्यापकरूपेणावसरं नीतवान्। तस्य कर्मजीवनापेक्षया तस्य सर्जनात्मकचिन्तनस्य जीवनं महत्तरमासीत्। सः मौलिककाव्यरचनायाम् अग्रगण्यः। संस्कृतभाषायां मौलिकरचनायाः लेखनीचालनीं करमहोदयः छात्रावस्थायां प्रारब्धवान्। तस्य प्रथमप्रकाशः 'पूतप्रेम' इति। तस्यापराः कृतयो यथा--दोषशतकम्, चयनम्, उपदेशद्विशति, त्रिरङ्गम्, भारतभूप्रशस्तिः, शेषस्वनितम्, मानसहंसदूतम् आदि। तस्य लेखनी साहित्यधारायाः बहुत्र स्पर्शं करोति। तद्यथा--शतककाव्यम्, द्विशतिकाव्यम्, दूतकाव्यमादि। तेनापि टीका तथा च अनुवादः कृतः। लहरीपञ्चकस्य संस्कृतटीका तेनैव कृता। न केवलं संस्कृतभाषायापितु उत्कलभाषायां तस्य दक्षता स्मरणीया। A.B. Keith History of Calssical Sanskrit Literature इत्यस्य पुस्तकस्योत्कलानुवादं कृतवान् सः। ग्रामीणकवेः काव्यप्रतिभायाः प्रकाशनं राष्ट्रीयसंस्कृतसंस्थानम् देहली, राष्ट्रीयसंस्कृतविद्यापीठम् तिरुपतिः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी इत्यादौ स्थाने भवति येन कवेः काव्यप्रतिभायाः गुरुत्वं लक्ष्यते। बहुविधैः प्रशंसापत्रैः उपाधिभिः सम्मानीतोयं ओडिशा संस्कृत एकादेमितः जयदेवसम्मानेन, तिरुपति संस्कृतविद्यापीठतः वाचस्पत्युपाधिना भूषितः। अन्ततोगत्वा कविरयं महामान्यराष्ट्रपतिना संस्कृतभाषायां कृत्यर्थं पुरस्कारेणापि सम्मानीतः।

करमहोदयस्य परिवारः संस्कृतपरिवारः। तस्य पुत्राः, पुत्रवधूः, पुत्री, जामात्रादयः संस्कृतसेवकाः। पुत्रौ कमललोचनकरः, गङ्गाधरकरः च संस्कृताध्यापकौ, पुत्री कनकलतादेवी संस्कृतप्राध्यापिका तथा च जामाता दीनबन्धुकरोऽपि अध्यापकः।

## सदाशिव प्रहराजः

रणपुरगडनिकटस्थ लतार ग्रामे विंशशतकस्य प्रथमे चरणे सदाशिवप्रहराजस्य जन्म अभवत्। तस्याध्यापकजीवनं विशेषतया गङ्गाधमेहेरमहाविद्यालये आसीत्। ततः आचार्यपदादवसरं नीतवान्। धर्मशास्त्रविशारदः सदाशिवप्रहराजः। शास्त्रानुमोदितस्य परम्परामनुसृत्य जीवनधारणं कर्तुं सदा सर्वान् मार्गं दर्शयन्ति। पुत्री शान्तिप्रिया देवी तथा च जामाता सुवासचन्द्रदाशोऽपि संस्कृतसाहित्यस्य सेवां कुरुतः।



## जयकृष्णमिश्रः

जयकृष्णमिश्रः रणपुरगडे विंशशतकस्य मध्यभागे जनिमलभत। श्रीजगन्नाथ-संस्कृतविश्वविद्यालये आचार्यरूपेण कार्यरतः। धर्मशास्त्रे विद्यावारिधिं विद्यावाचस्पतिं च कृतवान्, सः अद्वैतवेदान्ताचार्यः अपि। संस्कृतसाहित्यस्य गवेषणां तथा संपादनकार्यं कृत्वैव तस्य मौलिकरचनायां महती प्रसक्तिः। तस्य कृतिर्भवति संस्काराणां पर्यालोचनम्, राजधर्मविमर्शः, विज्ञानेश्वरामृतम्, धर्मशास्त्रेतिहासः आदि। संपादितग्रन्थाः सन्ति कृत्यकौमुदी, शुद्धिसारः, भ्रमपदम्, शुद्धिचन्द्रिका, श्राद्धदीपादि। तस्य उत्कलानुवादः वामदेवसंहिता, पराशरस्मृतिः, मूलरामायणम् इत्यादि।

## गोपबन्धु मिश्रः

विंशशतकस्य मध्यसोपाने नयागडमण्डलान्तर्गत विरुडा इति ग्रामे गोपबन्धुमिश्रस्य जन्म। प्राच्यपाश्चात्यविद्ययोः सुपरिचितः गोपबन्धुमिश्रः रवीन्द्रनाथठाकुरस्य शान्तिनिकेतनतः एम्.ए.उपाधिं लभमानः स्वप्रतिभायाः पल्लवनं कृतवान्। अध्यापनकार्यम् आरा, विहारतः प्रारब्धवान्। अयं संप्रति काशीहिन्दूविश्वविद्यालये आचार्यः। नव्यव्याकरणोपरि निष्ठां धारयन् परिभाषेन्दुशेखरस्यालोचनायां विद्यावारिधिं तथा कृत्प्रत्ययानां विवरणात्मकं विश्लेषणात्मकमध्ययनं कृत्वा विद्यावाचस्पतिं प्राप्तवान्। गवेषणायाः तथा मौलिकरचनायाः विचारविमर्शपूर्वकम् उपस्थापनं कर्तुं सः अति निपुणः। तस्य मौलिकरचनापि प्रकाशिता। तस्य कृतिः अपरा यशोधरा, अन्तःसलिला, रेखाचित्रम् इत्यादयः कथाः संभाषणसन्देशपत्रिकायां, कथासरित् पत्रिकायां अन्यत्रापि प्रकाशिताः। तस्य संपादकत्वेन संस्कृतभाषायां संस्कृतप्रचारपरिषद्, आरातः आरण्यकम् इति शोधपत्रिकायाः प्रकाशनं भवति। सद्यः पारिस् नगरे सोर्वन् नोवेल विश्वविद्यालये, भारतीय सांस्कृतिक सम्बन्ध परिषद् (ICCR), भारतसर्वकारपक्षतः अतिथ्यध्यापकत्वेन 2010-2012 पर्यन्तम् अध्यापनं कृतवान्। सः विश्वप्रसिद्धस्य अन्यतमस्य ग्रन्थस्य 'ल प्रेति प्रान्स (Le Petit Prince) इति फ्रेञ्चभाषारचितस्य ग्रन्थस्य संस्कृतानुवादं 'कनीयान् राजकुमार' इति नाम्ना कृतवान्। अन्यच्च 'महाभाष्यादर्शः' इति प्यारिस् नगरे स्थिते ग्रन्थालये प्राप्तस्य अनन्यस्य महाभाष्योपरि श्लोकबद्धटीकाग्रन्थस्य संपादनं विहितवान्।

## पराम्बा श्रीयोगमाया

विंशशतकस्यान्तिमचरणे खण्डपडागडथ भापुरे पराम्बा श्रीयोगमायायाः

जन्म। सा काशीहिन्दूविश्वविद्यालयतः स्नातकोत्तरादनन्तरं उत्कलविश्वविद्यालयात् विद्यावारिधिं प्राप्तवती। संस्कृतसाहित्यस्य गवेषणया सह मौलिकरचनायां स्वीयं चिन्तनं सुतरां संरक्षितवती। वेदविदुषी सा संस्कृतसाहित्यस्य बहुविभागं स्पर्शं करोति। कवितारचना, क्षुद्रगल्पसंरचना, मौलिकप्रबन्धोपस्थापना, अनुवादकार्यम् इत्यादि तस्याः जीवनस्याङ्गमेव। तस्याः कृतिर्भवति मन्दाकिनी, प्रबन्धानां संकलनमिति, मृत्युः चन्द्रमसः गोकुलानन्दमहापात्रस्य वैज्ञानिकतत्त्वाधारितोपन्यासस्य अनुवादः। अपरा कृतिः 'संपर्कः' क्षुद्रगल्पसंग्रहः तथा 'हे मदीय दूरबन्धो' संस्कृतकवितासंग्रहः।

### उपसंहारः

नयागडस्य विद्वांसः प्रान्ते देशे संस्कृताध्यापकः भूत्वाथवान्यप्रकारेण संस्कृतसेवां कुर्वन्ति। संस्कृतशिक्षकरूपेणापि बहुत्र कार्यं कुर्वन्ति। मन्ये इतोऽपि सन्ति हवः ये मौलिकरचनायां धुरीणाः। अप्रकाशनकारणतः तेषां परिचयः गुप्तोऽस्ति। संस्कृतसाहित्यस्य प्रभावेण संस्कृतानुकृतिः उत्कलभाषायां लिखन्तः सन्ति बहवः। उत्कलघण्टयदुमणिः अष्टादशशतकस्य परिचितः पण्डितः। मौलिकरचना भवतु अथवा रचनानुकूलवातावरणस्य निर्माणं भवतु उत प्रचारप्रसारः भवतु, नयागडस्य विद्वांसः सर्वदा सारस्वतसाधनायां निरताः सन्तीति दिक्।

❖

### सन्दर्भग्रन्थाः

1. संस्कृतविद्वत्परिचायिका, Gen. Editor, Radha Vallabh Tripathy, Rashtriya Sanskrit Sansthan, New Delhi, 2012

2. 'Sanskrit Scholars of Orissa', Jayanti Rath, Orissa Review, April, 2006

3. अन्तर्जालम् (Internet)

4. वैयक्तिकः सम्पर्कः (Personal Contact (By Phone)

❖



# चार्वाकदर्शनस्य प्रयोजनीयता

बङ्गीयं मूलम्-स्वामी प्रज्ञानन्द सरस्वती
संस्कृतानुवादकः-श्रीसुदीप्तमुन्सी

भारतीयपरम्पराया प्रकाशितेषु दर्शनप्रस्थानेषु चार्वाकदर्शनमन्यतममेकम्। आस्तिकविचारधाराऽवलम्बिनां मध्ये एतत्प्रति अवश्यमेव एका हेयबुद्धिः स्वत उत्पद्यते। प्रायः प्रत्येकास्तिकश्रेण्यन्तर्गतपुरुष उक्तदार्शनिकसिद्धान्तस्य अतीवोर्ध्वं सन्तिष्ठते। महत्ताच्छिल्येन सहैव चार्वाकदर्शनस्योल्लेखस्तैः क्रियते--

**यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥**

इति विषयं तु सामान्यतः शास्त्रसंस्कारेण संस्कृतः पुरुष एव सम्यक्तया बोद्धुं शक्नोति। प्रयोजने उपस्थिते सति ऋणग्रहणपूर्वकमपि घृतं पेयं, किन्तु यावज्जीवनं धारणीयं तावत् सुखेनैव तन्निर्वहणीयमेकदा शरीरे भस्मीभूते तत्पुनरागमनासम्भवादिति तु अस्याशयः।

चार्वाकदर्शनप्रणेतारः खलु स्वयं सुरगुरवो बृहस्पतयः। यथा तैर्लिखितं तथैतद्दर्शनरूपेणापि प्रतिष्ठापितम्। भारतीयदर्शनस्य मुख्योद्देश्यरूपाः या आत्मनः स्वरूपावगतिपरमानन्दप्राप्तिमुक्तयश्च, तास्तूक्तदर्शनसिद्धान्तरूपेणापि प्रतिपादिताः। दर्शनशास्त्रस्य मूलोद्देश्ये प्रतिपादिते सत्यपि तत्प्रयोजनं कीदृशं तावत् संसाधितं तदवश्यमेव विचारणीयम्।

चार्वाकदर्शने स्थूलशरीरस्यैवात्मस्वरूपत्वं प्रतिपादितम्। एतत्सिद्धान्तप्रतिपादनाय "स वा एष पुरुषः अन्नरसमय" इत्येवं श्रुतिप्रमाणमपि व्यवहृतम्। छान्दोग्योपनिषदोऽष्टमेऽध्याये इन्द्रविरोचनाभ्यां प्रजापतिर्ब्रह्मा प्रथमपर्याये उपदेशमेनं प्रदत्तवान्।

उपर्युक्तोपदेशेन इन्द्रः सन्तुष्टो न भवन्नुत्तरोत्तराध्यात्मिकोन्नतेर्मार्गेण अग्रं गत्वा परिशेषे आत्मज्ञानं प्राप्तवान्, किन्तु विरोचन उक्तेनोपदेशेनैव सन्तुष्टोऽभूदिति।

उपदेशस्य नियमस्तावदधिकारिभेदमवलम्ब्य भवति। विरोचनस्याधिकारानुसारेण स्थूलशरीरमेवात्मा तस्य च पोषणयत्ने निष्ठा कर्तव्येति निरूपितम्। इन्द्रोऽग्रं गत्वाऽऽत्मज्ञानमलभत। तथा ह्यात्मनः स्वरूपविज्ञानस्य प्रथमसोपानं भवति चार्वाकसिद्धान्तोऽयमिति। अतएव प्रथमसोपानस्यानवलम्बनात् कदाचिन्महाविपज्जायते। वस्तुतः, कस्यापि यत्किमपि भवतु शास्त्रज्ञानं तत्त्वज्ञानञ्च, किन्तु चार्वाकसिद्धान्ते तिलाञ्जलिप्रदानेन तस्य व्यावहारिकं जीवनं न निर्वहति। यावदेव तेन स्वशरीरमात्मरूपेण न मन्यते, तावत् खलु न सम्भवितुं शक्नोति कस्मिन्नपि कार्ये तस्य प्रवृत्तिः। साधनभजनमपि शरीरमाध्यमेनैव सम्भवति। योगसाधनाद्वारा समाधिदशायां मनस एकाग्रतामवलम्ब्य अवश्यमेव शरीरेण सह असङ्गत्वस्य प्रतिष्ठा भवति। किन्तु न सम्भवति इयं समाधिस्थितिः कदापि शरीरं विहायेति। देहं स्थिररूपेण संस्थाप्य शरीरद्वारैव देहातिरिक्ते आत्मनि मनोनिवेशपूर्वकचित्तवृत्तिनिरोधः कर्तव्यः। मीमांसादर्शन-व्याख्यातं वेदस्य कर्मकाण्डोक्तयागयज्ञाद्यनुष्ठानमपि देहात्मबोधं विना न सम्भवति। यजमानत्वग्रहणाचार्यवरणासनोपवेशनाहुतिप्रदानादयः क्रिया अपि देहातिरिक्ते आत्मनि कदापि न सम्भवन्ति, अपि तु स्थूलशरीराभिमानिन्यात्मन्येव भवितुमर्हन्ति। स्थूलशरीराभिमानी आत्मैव उत्तिष्ठति, उपविशति, आहुतिप्रदानादिसकलक्रियाश्च सम्पादयति। तदुक्तं हि "शरीरमाद्यं खलु धर्मसाधन" मिति।

वेदान्तदर्शनस्याध्यासभाष्येऽद्वैतमतप्रतिपादकैर्जगन्मिथ्यात्वनिरूपकैर्भगवद्भि-श्श्रीमच्छङ्कराचार्यैरपि उक्तं 'पश्वादिभिश्चाविशेषा' दिति। अस्य व्याख्यायां स्वयमेवोक्तं तैर्यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततः निवर्तन्ते, अनुकूले च प्रवर्तन्ते। यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य "मां हन्तुमयमिच्छती"ति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखी-भवन्ति। एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीन् आक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततः निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते" इति। गमनागमनभोजनश-यनादयः सर्वे चार्वाकसिद्धान्तमेवानुसरन्ति। शौचाचारादिविषये आचार्यशङ्करैः स्पष्टत उक्तं "व्यवहारे भट्टनय" इति। यत्तु कुमारिलभट्टैरुक्तं, तदेव व्यवहारिकसत्तायां



ग्रहीतव्यमित्यर्थः। यतो वेदान्तनिरूपणीयं वस्तु भवति पारमार्थिकसत्तारूपं ब्रह्मतत्त्वम्। प्रातिभासिकसत्ताया मिथ्यात्वं सर्वैः सिद्धं, यथा शुक्तिरजतमरुमरीचिकादिस्वाप्निकपदार्थः। व्यवहारिकसत्तायां ब्रह्मतत्त्वम्। व्यवहारिकसत्तायां तिष्ठन्त एव विचारमादानप्रदाना-त्मकव्यवहारं वा कुर्मः। अनेन पारमार्थिकसत्तायां निरूपितायामपि सत्यामादानप्रदानार्थं तु व्यावहारिकसत्ताया याथार्थ्यस्य (तात्कालिकस्यापि) स्वीकरणं विना गत्यन्तरं नास्ति। आधुनिकव्यवहारेऽपि Identity Card इत्याख्येन परिचयपत्ररूपेण स्थूलशरीरस्य प्रतिचित्रमुतावयवस्य विवरणं सगृह्यते। नाम्नः पुरुषस्य निर्दिष्टावयव-गतभिन्नत्वे जाते सत्युच्चस्वरेण स्वपक्षसमर्थनेनापि तद्वास्तविकता न स्वीकृता भवति।

चार्वाकदर्शनातिरिक्ते दर्शने आत्मनोऽमरत्वं प्रतिपादितम्। किन्तूक्तसिद्धान्तावल-म्बनेन विचारालये विचारो च चलति। आत्मन्यमरे स्वीकृते सति मृत्युदण्डो मृत्योः कृते दण्डो वा कदापि न सम्भवति। आत्मानमच्छेद्याभेद्याक्लेद्येत्यादिकं प्रतिपाद्य हननाद्यपराधान् मुक्तिर्न मिलति। यदि ऋणं संगृह्य केनापि "वयं जन्मान्तरवादिनस्तत आगामिनि जन्मनि अवश्यमेव ऋणमेनं परिशोधयाम" इत्येवमुच्यते, तर्हि कस्यापि विचारालयस्य न्यायाधीशेनायं पक्षो न मान्यः। आत्मनः सर्वव्यापकत्वस्य सिद्धान्तं स्वीकृत्यापि विचारविभागीयान्वेषणं निर्णयो वा भवितुं नार्हति। वेदान्तोक्तैकमेवाद्वितीयमिति-सिद्धान्तानुसारेण सर्वत्र सर्वेषु चैकस्यैवात्मनोऽस्तित्वस्वीकरणेन यथा केनापि कं प्रत्यपि अभियोगमानेतुं न शक्यते, तथैव प्रकारेण कोऽपि केनापि नोपकरिष्यते इति। सुतरां चार्वाकदर्शनोक्तस्यात्मनः स्वरूपावगतिद्वारैव व्यवहारिकजगतः क्रियाकलापः सम्पन्नो भवति। ततश्चेतनविशिष्टं शरीरं सम्पूर्णव्यवहारस्य निर्वाहकमर्थाद्व्यवहारिक आत्मेति।

चार्वाकदर्शनेन देहात्मरूपेण प्रतिपादितस्य देहातिरिक्तस्य पदार्थस्यानात्मत्वं निश्चयीकृतम्। सुतराम्, "आत्मा वै जायते पुत्र" इति श्रुतिवाक्यस्य दृष्टान्तप्रदानेन पुत्रादिपदार्थस्य याऽऽत्मरूपता प्रतिपाद्यते, तत्तु निराकृतम्। अतएव देहातिरिक्तस्य जडपदार्थस्याप्यात्मरूपता निराकृता। दर्शनेनैतेन चेतनविशिष्टशरीरायात्मरूपेण स्वीकृतिः प्रदत्ता।

सामान्यत आध्यात्मिकाधिभौतिकाधिदैविकेति भेदेन दुःखस्य प्रकारत्रयं वर्तते।

तत्राध्यात्मिकदुःखस्य व्युत्पत्तिपरिलक्षणेन अनेकशो दर्शनस्यास्य परितुष्टिर्भवति। आत्मानमधिकृत्येति अध्यात्मम् तत्र भव आध्यात्मिकमिति। अत्र आत्मेति शब्दस्य अर्थः शरीरमेव। रोगादीनां निवृत्तिश्चिकित्सादिना भवति। आधिभौतिकेत्युक्ते चौर-व्याघ्रादिकृतप्रकोपजन्यदुःखं सूच्यते। एतन्निवृत्तेर्विभिन्नप्रकारकराजकीयसामाजिकसुरक्षाया आवश्यकता वर्तते। अतिवृष्ट्यनावृष्ट्यादिरूपमाधिदैविकं दुःखम्। एतस्माद्रक्षणायान्नजल-संरक्षणं देवताया उत ग्रहतुष्टेर्विधानञ्चोपलभ्यते।

उपर्युक्तस्य त्रिविधदुःखस्यात्यन्तिकनिवृत्त्यर्थं चार्वाकदर्शनकारेण उपायेऽनिर्दिष्टेऽपि व्यावहारिकायास्तात्कालिकाया वा निवृत्तेरुपायोऽवश्यमेव प्रदर्शितः। साधारणत एवमुच्यते यदभुक्ते सति शास्त्रादिर्न प्रीतिमुत्पादयतीति। चार्वाकसिद्धान्तेन मनुष्याणां मनसि एवं चिन्ता उदेति यद्रोगशोकानां निवृत्तेरुपायस्यानुसन्धानं कर्तव्यमिति। उपायोऽस्तीति इतरेण शास्त्रेण प्रदर्शितमपि।

रोगशोकादेस्सामयिकनिवृत्तिरानन्दस्य सामयिकानुभवश्च अवश्यमेव मनो दुःखकष्टादेरात्यन्तिकनिवृत्तिं परमानन्दप्राप्तिञ्च प्रति स्वाभाविकतया प्रेरयति। कस्यचिदपि पुरुषस्य कस्मिंश्चित् प्रकोष्ठे जीर्णे सति किन्तु सम्पूर्णरूपगृहनिर्माणेऽशक्ते च, तस्य कृते सामयिकसंस्कारपूर्वको व्यवहार एव श्रेयान्। अनुरूपतया दुःखस्यात्यन्तिकनिवृत्तेः परमानन्दप्राप्तेश्चोपायस्यानधिकारिभ्योऽपि सामयिकानन्दं दातुं शक्यते। व्यावहारिकसत्तायामेव अस्मच्छरीरस्योत्पत्तिः। यावत्क्रियाकलापोऽपि शरीराधीनः। व्यावहारिकसत्तां परित्यज्य कोऽपि क्रियाकलापो न सम्भवतीति तु पूर्वम् एवालोचितम्। अस्या व्यावहारिकसत्ताया व्यावहारिकोपयोगिता अन्ये दर्शने न स्पष्टरूपेणोल्लिखिता। व्यावहारिकक्रियाकलापस्य कृते चार्वाकदर्शनेन प्रदत्तो निर्देशोऽवश्यमेव विचारणीयः। अत्यन्तस्थूलबुद्धिसम्पन्नचार्वाकदर्शनस्य यावज्जीवेत्सुखं जीवेद् इत्येवमुक्त्या चार्वाकदर्शनकारैः सर्वदा सुखपूर्वकजीवनधारणविषये कथितम्। एतत्तु जातिधर्मनि-र्विशेषरूपेण सर्वप्राणिभिराकाङ्क्षितम्। कोऽपि न स्वीयजीवने कष्टं विपदं वेच्छति। श्रीमद्भागवते दृश्यते यन्मात्रा कुन्त्या श्रीभगवन्तः प्रार्थिताः-

**विपदः सन्तु नः शश्वत् तत्र तत्र जगद्गुरोः।**
**भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्॥** इति

हे जगद्गुरो श्रीकृष्ण! अहं सर्वदा विपदमिच्छामि। सम्पदं नाकाङ्क्षामि। यतो



यदैव सम्पदायाति, तदैव भगवत्स्मरणं पूर्णमात्रया न भवतीति मन्ये। किन्तु यदैव विपदायाति, तदैव विपद्भञ्जन मधुसूदन! तव स्मरणेन दर्शनमपि लब्धं मया। अतएव विपन्मे प्रयोजनं येन मुक्तिप्रदभगवतो दर्शनं लब्धुं शक्यते।

सूर्योदयं समारभ्य यावत् सूर्यास्तं धनोपार्जनाशासमन्विता मनुष्या अक्लान्तपरिश्रमं कुर्वन्ति। धनोपार्जनसमये तेऽनिच्छासत्त्वेऽपि बहुप्रकारकक्लेशमवश्यमेव स्वीकुर्वन्ति। किन्तु सकले परिश्रमे परिसमाप्ते किञ्चित् पारिश्रमिकं लभन्ते, यद् द्वारा स्वीयसंसारं प्रतिपालयन्तस्त आनन्दमनुभवन्ति। सुखपूर्वकजीवनधारणायैव इयं व्यवस्था। कदापि दुःखदायकं कार्यं न करणीयमित्येवं नैतिकी शिक्षाप्येतेन प्रदीयते। सर्व-सुखपूर्वकं जीवनधारणायोपदिष्टः। सुतरां कदापि अपरस्मै दुःखप्रदानमुत स्वस्य दुःखग्रस्तावस्थाप्राप्तिरपरस्य कृते दुःखस्य कारणं निर्माणं वा न सङ्गच्छते। स्वशरीरस्यापि स्वास्थ्यरक्षणाय विधानं विधीयते एतद्दर्शनकृता। आहारविहारादिकार्ये इन्द्रियसमूहस्य संयमरक्षाया उपदेशोऽप्यर्थतो लभ्यते। यतोऽपरिमितखाद्यपानग्रहणे इन्द्रियाणामभिशप्ते कार्ये विनियोगे च तेऽपि शिथिला भवन्ति। प्रादुर्भूयते चातः शारीरिकास्वस्थता। इन्द्रियसमूहस्य दृढ़त्वसम्पादनाय संयम आवश्यकः। न हीन्द्रियाणामस्तित्वादुपभोगः कर्तव्य इति चार्वाकदर्शनेनोक्तम्। यथाधिकशर्करासेवनेन प्रायो मनुष्या मधुमेहरोगाक्रान्ता भवन्ति, तथैव अनैतिकयौनसम्बन्धेनापि 'एड्स्' (AIDS) इति रोगस्य प्रादुर्भावो भवति। अतएव सुखिजीवनस्य कृते अस्माभिः संयताहारव्यवहारेण सह हितकरखाद्यग्रहणस्य शरीरस्य कृते हानिकरमादकद्रव्या-देर्वर्जनस्य चोपदेशः प्राप्तः।

चार्वाकदर्शनस्य द्वितीये पर्याये ऋणं कृत्वा घृतं पिबेदिति कथितम्। पूर्वम् एवोक्तं यद् व्यावहारिकसत्तायां स्थितो मनुष्य आहारविहारादिकं परित्यक्तुं न शक्नोतीति। एतदाहारविहारादेस्सुव्यवस्थायाः कृतेऽर्थस्य प्रयोजनं वर्तते। यदि प्रयोजनीयार्थस्याभावः स्यात्तर्हि प्रयोजनानुसारेण ऋणं ग्रहीतव्यं किन्तु चौर्यलुण्ठनाप-हरणादेर्मार्गो न कदापि समुचितः। ऋणविधानेन एतद्दर्शनेनानुचितकार्येभ्यो विरतिरुपदिष्टा। ऋणग्रहणमात्रेण तत्परिशोधः कर्तव्यः। सुतरां तदर्थं परिश्रमः करणीयस्तथा ऋणपरिशोधस्य कृते मितव्ययितायाः अभ्यासोऽपि। तत उद्यमः कर्तव्यः। फलतः कर्तव्यपरायणतायाः संयतव्यवहारस्य च शिक्षा एतेन दर्शनेन प्रदत्ता।

चार्वाकदर्शने केवलं प्रत्यक्षमेव प्रमाणरूपेण स्वीकृतम्। सुतरामनुमानादिप्रमाणद्वारा युक्तितर्कमाध्यमेन वा व्यावहारिकसत्ताया अपलापः कदापि न समीचीनः। अनुमान-युक्तितर्कद्वारा लोकोत्तरपदार्थस्य सिद्धावपि प्रत्यक्षोपलब्धवस्तुनो नेतीकरणे कुत्र वा युक्तितर्कादेः प्रयोजनम्? गृहाभ्यन्तरं सर्पे प्रविष्टे तस्य सर्पस्य जात्युत्पत्तिस्थानागमनमार्गवयः सीमादिविषया न विचारणीयाः, किन्तु तस्यादावापनोदनं संहननं वा कर्तव्यम्। उक्ते समयेऽज्ञाननिवृत्तेरुपायानुसन्धानमुत योगासनमाध्यमेन चित्तवृत्तिनिरोधप्रक्रियेति केनापि सम्यङ् न मन्यते। अस्तु, शरीरे सुस्वास्थ्यगते यदि कोऽपि उपर्युक्तसाधनमवलम्ब्याग्रं गच्छति, तर्हि तत्र कस्या अपि क्षतेराशङ्का भवितुं नार्हति।

पूर्वम् एवोक्तं यच्चार्वाकदर्शनानुसारेण शरीरमिदमात्मरूपेण स्वीकृतं, यस्य च स्वीकरणं विना गत्यन्तरं नास्तीति। तदात्मस्वरूपदेहोऽपि प्रत्यक्षप्रमाणद्वारैव ग्राह्यः। स्थूलशरीरस्य प्रतिपादनाय प्रत्यक्षातिरिक्तप्रमाणस्य प्रयोजनं न वर्तते। तद्देह उत स्थूलशरीरमस्मिन्नेव जगति परितिष्ठति। तत्तु अग्निना दह्यते जले समवलीयते भूगर्भे वा तस्य समाधिः संरच्यते। सुतरां देहस्य गमनागमनं कदापि न सम्भवति। रावणहिरण्यकशिपुकंसादीनामासुरप्रवृत्तिसम्पन्नानां नृणामस्य स्थूलदेहस्यामरत्वविधानाय कठोरतपस्यादेः सत्त्वेऽपि तेषां परिश्रमो न साफल्यं गतः। स्थूलसूक्ष्मकारणशरीरा-तिरिक्तस्यात्मनो विषयो न चार्वाकदर्शनेन विचार्यः। तथाह्यत्रोक्तं भस्मीभूतस्य देहस्येति। यच्छरीरं भस्मीभूतं भवति, तस्य पुनरागमनं न खलु केनापि दर्शनकारेण स्वीकृतम्। अखिलजगति सर्वैरेवमेव ज्ञातम्।

अत्रापर एकः सुन्दरो भावो परिलक्षणीयः। सति देहे भस्मीभूते तस्य भस्मप्राप्तस्य देहस्य पुनरागमनं न स्यात्। सुतराम् एतेन देहेन यदृणं गृहीतं, तत्तु एतच्छरीरेणैव परिशोधनीयम्। आत्मनो नित्यत्वमुत जन्मान्तरवादमवलम्ब्यागामिनि जन्मनि तत्परिशोधपरिकल्पनाया औचित्यं न खलु केनापि सम्यङ् मन्यते।

चार्वाकदर्शने दण्डनीतिरत्यन्तस्थूलरूपा। अत्र राज्ञे एवेश्वरस्य स्थानं प्रदत्तम्। प्रत्यक्षप्रमाणं भवति सकलेतरप्रमाणानामुपजीव्यम्। प्रत्यक्षप्रमाणं कोऽपि नाङ्गीकर्तुं न शक्नोति। प्रत्यक्षप्रमाणमिदं भवति श्रेष्ठं प्रमाणम्। सुतरां सर्वस्मिन् व्यावहारिके क्षेत्रे एव चार्वाकदर्शनस्य प्रयोजनीयता अत्यन्तं स्पष्टेति दिक्।

❖



# संस्कृतज्ञानाम् आधुनिकीतिकर्तव्यता

डा. के. अरविन्द रावः

कतिभ्यः मासेभ्यः प्राक् 'भारतदेशस्य विदलनम्' (Breaking India) नामकः ग्रन्थः मया पठितः। अमेरिकादेशस्थः राजीव मल्होत्राः एतस्य लेखकः। अस्माकं देशस्य श्लथीकरणाय, विदलनाय च अन्यदेशीयैः कीदृशः यत्नः क्रियते, कीदृशाः व्यूहाः विरच्यन्ते इत्येतत् सर्वं तस्मिन् ग्रन्थे सोदाहरणं प्रपञ्चितम्। 'यू ट्यूब्' मध्ये अपि अस्मिन् विषये चर्चागोष्ठीः द्रष्टुं शक्नुमः। ग्रन्थस्य पठनानन्तरम् अस्माकं देशे अद्यतनी स्थितिः कीदृशी इति प्रश्नः मम मनसि उत्पन्नः। तत्र विचारसरणिः एवं प्रस्तूयते।

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत, तदाऽऽत्मानं सृजामी'ति आश्वासितवान् श्रीकृष्णः। अद्यत्वे धर्मरक्षकाः संस्कृतपण्डिताः, पीठाधिपतयः, जगद्गुरवः एव, धर्मस्य परिरक्षणे सर्वकारस्य औदासीन्यात्। जगतः जङ्गमशीलत्वं परिगणय्य तदनुकूलपद्धत्या धर्मरक्षार्थं कार्यक्रमः कल्पनीयः सर्वैः अस्माभिः।

**अद्यतनी स्थितिः**

**1. विषयप्रचारः**—विदेशीयाः यदा अस्माकं ग्रन्थानाम् अध्ययनं कुर्वन्ति तदा वयम् अतीव सन्तुष्टाः भवामः, अहो अस्माकम् औत्कृष्ट्यम् एते प्रशंसन्तीति। परं तु तेषु केचिदेव संस्कृताध्ययनं जिज्ञासया कुर्वन्ति, बहवस्तु क्रैस्तवधर्मसंस्थाभिः प्रेरिताः, छिद्रान्वेषणतत्पराः भूत्वा अध्ययनं कुर्वन्ति। अस्माकं समाजे वर्णानां मिथः यानि व्यवहारस्थानानि ये च विभेदाः सन्ति तेषामध्ययनं, वैदिकधर्मविद्वेषिणां निर्माणं, धर्मव्यतिरेकविचाराणां प्रसारः इत्यादिकं तेषां मुख्यः आशयः। अस्माकं

ग्रन्थानां परिहासः, मुख्यतः पुराणेषु विद्यमानानां विषयाणामधिक्षेपः, खण्डनं च कुर्वन्ति। यथा रामायणादिग्रन्थेषु विद्यमानाः राक्षसाः अद्यतनाः दलितजनाः एव, ब्राह्मणाः तेषां दमनमकुर्वन्निति, अथवा गीताग्रन्थः उग्रवादस्य प्रोत्साहकः इति अथवा हैन्दवाः शिश्नपूजकाः इत्येवं बहुधा खण्डनम् अपहासं च कुर्वन्ति। अत्र बहून्युदाहरणानि उपर्युक्तग्रन्थे द्रष्टव्यानि। वैदेशिकाः पण्डिताः अस्माकं व्याकरणं न खण्डयन्ति (प्रत्युत श्लाघयन्ति, येन अस्माकं पण्डिताः सिद्धान्तं परित्यज्य पाणिनि-भर्तृहर्यादिषु निमग्नाः भवेयुः इति), न वा तर्कं खण्डयन्ति, अपि तु वेदान्तसिद्धान्तस्य मूलानि छेत्तुमिच्छन्ति। तस्य अवहेलनेन, हिन्दुधर्मः 'Racist, Fascist' इत्येवं ख्यापनेन च विद्याधिकाः एतं धर्मं त्यजेयुः इति। अतएव वेदान्तशास्त्रपण्डितानां निर्माणम् आवश्यकं भवति। तार्किकाः, वैयाकरणाश्च दुष्प्रचारस्य खण्डनं न कर्तुं पारयन्ति। लोके व्याकरणप्रवचनं, तर्कप्रवचनं वा नैव क्रियते, अपि तु रामायण-भागवतादिप्रवचनं क्रियते। दुष्प्रचारस्य खण्डनाय वेदान्तशास्त्रपण्डितः एव समर्थः भवति, प्रवचनायापि स एव समर्थो भवति। अपहाससमाधानार्थं शास्त्रदृष्ट्या, अर्थात् दार्शनिकदृष्ट्या, प्रवचनं करणीयं भवति न तु पौराणिकदृष्ट्या।

**2. पण्डितानां ह्रासः**—पण्डितानां वैरल्ये बहूनि कारणानि सन्ति। यद्यपि आङ्ग्लभाषामोहः प्रथमं, तथापि प्राच्यकलाशालानां दुर्गतिः प्रमुखं कारणम्। प्रायः पञ्चविंशतिभ्यः वर्षेभ्यः प्राक् एताः कलाशालाः बहुभिः शास्त्रपण्डितैः अशोभन्त। कालक्रमेण तत्र पाठ्यप्रणाल्यां महत् परिवर्तनं सञ्जातम्, यथा शास्त्रविषयाणां न्यूनीकरणम्, अन्यपाठ्यविषयाणामनुप्रवेशः इत्येवं परिवर्तनेन अद्यतनेषु पण्डितेषु, छात्रेषु च शास्त्रपाटवं न्यूनं जातम्। यदा शास्त्रस्य ह्रासः तदा साहित्यक्षेत्रे सामाजिकस्तरे च उत्तमलेखकानामभावः, पुराणप्रवक्तॄणामभावः स्फुटं दृश्यते। शास्त्रानभिज्ञाः, संस्कृतानभिज्ञा अपि प्रचारमाध्यमेषु प्रवचनकाराः विराजन्ते। तैः धर्मविषयाः न बोध्यन्ते, अपि तु धर्मसम्मोहः एव संपाद्यते। अतः शास्त्रपण्डितानां निर्माणम् आवश्यकं भवति।

**3. समाजे परिवर्तनम्**—समाजे धर्मप्रचारकः प्रायेण ब्राह्मण एव आसीत्। न केवलं दैनन्दिनकार्यक्रमेषु अथवा नैमित्तिककार्येषु अपितु अध्ययनाध्यापनादि-



कार्येषु तस्यैव स्थानम् आसीत्। मुख्यतः ग्रामेषु तस्य स्थानं विलक्षणम् एव आसीत्। आङ्ग्लेयानाम् अधिकारसमये बहवः ब्राह्मणाः आङ्ग्लाध्ययनं प्रति आकृष्टाः सन्तः समाजे अन्यक्षेत्रेषु (अधिवक्तृरूपेण, सर्वकाराधिकारिरूपेण) प्रविष्टवन्तः, स्वराज्यस्थापनेऽपि मुख्यभागं गृहीतवन्तश्च। परं तु ब्राह्मणाः स्वधर्मं परित्यज्य धर्मप्रवर्तकानामभावेन अन्यधर्मीयाणाम् प्रवेशस्य कारणाच्च मुख्यतः क्रैस्तवमतावलम्बिनां सङ्ख्या इदानीम् आन्ध्रराज्ये विंशतिं प्रतिशतं यावद् वर्धिता।

अधुनातने काले ब्राह्मणानां स्वस्थानपरित्यागः, ग्रामेभ्यः निर्गमनं तीव्रतरं सञ्जातम्। बहवः सङ्गणकक्षेत्रे परिश्रमं कुर्वन्तः दृश्यन्ते। याज्ञिकाः पुरोहिताश्च स्वान् पुत्रान् सङ्गणकक्षेत्रे अथवा अन्यस्मिन् आधुनिकक्षेत्रे प्रवेशयन्तः दृश्यन्ते। ग्रामेषु जनानां नैमित्तिककार्याणि निर्वर्तयितुं यदा न काचित् व्यवस्था दृश्यते तदा अन्यधर्मीयाः तं कार्यं निर्वर्तयन्ति। यथा देशस्य सीमारक्षकाणां स्थानपरित्यागे अन्यदेशीयाः आक्रमणं कुर्युः, तथैव अस्माकं धर्मरक्षकाणाम् अभावे अन्येषामाक्रमणं निर्बाधं प्रचलति। अतः ग्रामेषु धर्मरक्षायै कीदृशी व्यवस्था निर्मातव्या इति चिन्तनीयम्।

**4. सिद्धान्तसंरक्षणम्**—अस्माकं पण्डितगोष्ठीषु शास्त्रसभासु च अद्यत्वेऽपि अविद्यमानानां साङ्ख्यानां बौद्धानां च खण्डनं क्रियते। भवतु नाम। तैरेव वादैः अद्यतनानां प्रधानमल्लानां क्रैस्तवादीनां मतनिरसनं कर्तुं शक्यते। तेषां धर्मशास्त्रं कीदृशमिति अस्माभिः न परिशील्यते। विमतीयाः अस्माकं ग्रन्थानां समग्राध्ययनं कुर्वन्ति यथा बौद्धाः साङ्ख्याश्च अकुर्वन्। श्रीशङ्कराचार्याः तदानीन्तनानां प्रतिपक्षाणां ग्रन्थान् वादाँश्च परिशील्य तेषां खण्डनमकुर्वन्। न्यूनातिन्यूनतया अन्यैः प्रत्युपस्थापिता वादाः अस्माभिः अध्येतव्याः, तेषां पूर्वपक्षः द्रष्टव्यः। वैदिको धर्मः अशास्त्रीयः इति, एते बहुदेवोपासकाः, प्रतिमाराधकाः, जन्तून् वृक्षाँश्च पूजयन्ति इत्येवम् एकदेवोपासनेन स्वमतमुत्कृष्टमिति च वदन्तः विद्याधिकान् आधुनिकान् आकर्षयन्ति। वैयाकरणा वा तार्किका वा एतान् समाधातुं न पारयन्ति, अतः वेदान्तसिद्धान्तस्य बाहुल्येन अध्यापनं करणीयम्। पाश्चात्त्यधर्मग्रन्थानां च अध्ययनम् आरब्धव्यम्।

5. अस्माकं देशे दक्षिणभारते एव विमतीयानां प्रभावः वर्धमानः इति अध्ययनेषु दृश्यते। ते दक्षिणदेशमुद्दिश्य (Catchment area for Christi-

anity) इति भावयन्ति। द्रविडदेशे द्रविडानां संस्कृतिः अन्या, आर्यसंस्कृतिः अन्या इत्यादिभेदबीजावपनेन तत्र हिन्दुव्यतिरेकिणां राज्यस्थापने कृतकृत्याः अभवन्। आन्ध्रराज्ये, मुख्यतः समुद्रतीरमण्डलेषु, दलितानाम् आधिक्यात् विमतीयानाम् अधिकः प्रभावः दृश्यते। अद्यत्वे देवालयानामपेक्षया 'चर्च' स्थलानां सङ्ख्या अधिका वर्तते। देशे यदा क्रैस्तवानां सङ्ख्या ईप्सितस्तरे, प्रायः 30 प्रतिशतम्, आयाति तदा (यथा अन्यदेशेषु कृतवन्तः) तदा अन्तर्युद्धस्यापि प्रेरणं करणीयमिति पाश्चात्त्यदेशानां व्यूहः। उपर्युक्तग्रन्थे अयं विषयः सम्यक् प्रपञ्चितः। अस्माकं दलित-बहुजनपण्डितानां प्रोत्साहनं, धर्मविरुद्धलेखनेषु प्रेरणं, सज्जनपण्डितानां तेजोवधः इत्यादि बौद्धिकसङ्ग्रामं 'चर्च' तथा पाश्चात्त्यसर्वकाराः संभूय कुर्वन्ति। अतः समाजस्य देशसमग्रताया रक्षणं धर्मरक्षणे एव आधृतं दृश्यते। Max Muller कालादारभ्य अद्यावधि क्रैस्तवसंस्थाः, पाश्चात्त्यसर्वकाराः संभूय धार्मिकराजकीयस्तरयोः सङ्ग्रामं कुर्वन्तः एव सन्ति। आरम्भे अस्माभिः तयोः परस्परसहकारित्वं व्यूहरचनाचातुर्यं च सम्यक् न अभिज्ञाते। इदानीं तु यथा Cancer प्रकोपानन्तरं स्फुटं ज्ञायते तथा तेषां समरहुङ्कारः सम्यक् श्रूयते। कर्णाटकराज्ये मतान्तरीकरणस्य प्रत्यूहाः सन्तीत्यतः कर्णाटकराज्यं rogue state इति उद्घोषितवन्तः तद्धर्मानुसारिणः। अनेन अन्यत्र अनर्गलरीत्या मतपरिवर्तनं प्रचलति इत्युक्तं भवति।

**चिन्तनीयाः विषयाः**

1. मनुष्यजीवने ऐदम्प्राथम्येन धर्मः आवश्यकः इत्यस्माभिः ज्ञातव्यः। यथा कस्यचित् राजकीयवर्गस्य दौर्बल्ये जाते अन्यो वर्गः राज्यमाक्रामति, तथैव यदा कस्यचित् धर्मस्य ह्रासः भवति, तत्स्थले अन्यो धर्मः प्रविशति। अयं लोकनियमः। मनुष्यः सर्वदा यस्य च कस्यापि धर्मस्य अनुष्ठानं कर्तुमिच्छति, अतः अस्माकं धर्मप्रचारकाणाम् अभावः कथं पूरणीयः इति चिन्तनीयः। समाजे यथा राजकीयस्तरे नेतृणाम् आवश्यकता दृश्यते, तथा धर्मनेतृणामपि आवश्यकता वर्तते। अत्र पीठाधीशानाम् मार्गदर्शनमपेक्षितं लोके। तथैव संस्कृतपरिरक्षणे निमग्नाः संस्थाः अपि पण्डितानां निर्माणे उद्युक्ताः भवेयुः। यद्यपि वैयाकरणाः तार्किकाश्च अपेक्षिताः,



उपकारका एव ते उपकार्यस्य वेदान्तसिद्धान्तस्य। अतः मुख्यतः वेदान्तशास्त्रस्य रक्षणं करणीयम्।

2. मण्डलेषु (districts) केचन पण्डिताः अद्यापि उपलभ्यन्ते। तेषु उत्तमानां वाग्मिनां चयनं, प्रशिक्षणं, अद्यतनस्थितेः बोधनम् इत्यदिकं करणीयम्।

3. मण्डलेषु कार्यकर्तॄणां समाजस्य सर्वेभ्यः वर्गेभ्यः चयनं, पुरोहितरूपेण शिक्षणं, समाजस्थितिविषये, लोकसङ्ग्रहविषये च कर्तव्यबोधनं करणीयम्।

4. शास्त्रपण्डितैः इतिहासपुराणादीनाम् अध्ययनं प्रवचनादिकं करणीयम्, दुष्प्रचारस्य खण्डनं च करणीयम्। अद्यत्वे बहवः विद्याधिकाः साक्षात् वेदान्तशास्त्रमवगन्तुं शक्नुवन्ति। पुराणादीनामपेक्षया सिद्धान्तस्य अवगाहने समर्थाः सन्ति। अधुना वक्तॄणामेव वैरल्यं न तु श्रोतॄणाम्। शास्त्रपण्डितैः अद्यतन-समाजस्यापि अध्ययनम् आवश्यकं भवति।

5. पाश्चात्त्यधर्माणां महती व्यूहरचना तथा च आचरणव्यवस्था वर्तते। अस्माकं तु न काचित् व्यवस्था दृश्यते। प्रतिवादिनां व्यूहानां विश्लेषणम् कुविमर्शकानां प्रतिरोधः संभूय करणीयः। समाजे केचन एतेषां समर्थकाः अपि सन्ति इत्येतस्य कारणानि चिन्तनीयानि। सहस्रेभ्यः वर्षेभ्यः अनुवृता या वर्ण- व्यवस्था दृश्यते सा कथं व्यवस्थापिता कथं वा अनुसृता इति वक्तुं न पारयामः, परं तु अद्यत्वे इयं व्यवस्था अधर्मत्वेन परिगण्यते इति वक्तुं शक्नुमः। सैव परैः ब्रह्मास्त्रम् इव अस्माकं समाजस्य विदलने प्रयुज्यमानम् अस्ति। धर्मविद्भिः अस्य परिहारः चिन्तनीयः। बहोः कालात् प्राक् श्रीशङ्करैरेवेदमुक्तम् - 'यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति' (ब्र.सू.3.1.25)। गीताभाष्येऽपि नीलकण्ठैः एवमुक्तम् - 'यस्मिन्कस्मिंश्चिद् वर्णे शमादयो दृश्यन्ते स शूद्रोऽपि एतैः लक्षणैः ब्राह्मण एव ज्ञातव्यः। यत्र च ब्राह्मणेऽपि शूद्रधर्माः दृश्यन्ते स शूद्र एव (18-41)।' समाजस्य सङ्घटने अस्य परिहारः अपरिहार्यः।

6. ग्रामेषु या धर्मरिक्तता (religious vacuum) वर्तते तत्र अस्माकं प्रणाली कीदृशी इति चिन्तनीयम्। कथं पुनः पुरोहितानां प्रोत्साहः, समाजविषये

अवगाहनम्, तेषां शिक्षणं च करणीयम् इति चिन्तनीयम्।

अद्यतनाः आधुनिकविद्यासंपन्नाः संस्कृतानभिज्ञाः, तस्मात् संस्कृतेः विषये अज्ञाः, इत्यतः अस्माकं संस्कृतेः प्रचारकाः रक्षकाश्च शास्त्रपण्डिताः एव।

आङ्ग्लज्ञैः संस्कृतपण्डितैः 'राजीव मतल्होत्रा महाशय'स्य उपर्युक्तः ग्रन्थः अवश्यम् अध्येतव्यः।

❖



# भासकालिदासयोः नाटकेषु स्त्रीपात्राणि

डा. के. उण्णिकृष्णन्

नाटकान्तं कवित्वमिति सूक्तिः संस्कृतवाङ्मये नाटकानाम् अद्वितीयं स्थानं प्रतिपादयति। प्राचीनैः तथा अर्वाचीनैः प्रथितयशस्कैः नितरां सम्पुष्टायामस्यां शाखायां समुज्वलां कीर्तिमवाप्तवन्तावेव भासकालिदासौ।

**''काव्येषु नाटकं रम्यं तत्र शाकुन्तलं वरम्''**

इति सूक्तिः कालिदासस्य सर्वोपादेयतामेव घोषयति। स्वरचनानिर्मितौ कालिदासस्यापि प्रेरणां संयच्छन् भासः कस्य वा सहृदयस्य मानसं न रञ्जयति।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः॥**

इति आर्षभारतीयसङ्कल्पः द्वयोरपि पण्डितप्रवरयोः नाटकेषु नितराम् अन्वर्थतया समाकलितो दृश्यते। सामाजिके तथा सांस्कृतिके मण्डले स्त्रीणां कृते प्रदत्तम् अत्युत्कृष्टं स्थानं द्वयोरपि कृतिषु सुष्ठु संलक्ष्यते। उभयत्रापि 'न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते' इति महद्वचनस्य प्रपञ्चनमेव संदृश्यते। स्वगुणगणैः नायकस्य समतुल्यस्थाने ततोऽप्युन्नते स्थाने वा विराजमानाः बह्व्यः नायिकाः दृश्यन्ते। भासस्य महात्मनः अतिविशिष्टं नायिकासङ्कल्पमुपजीव्य एव कालिदासस्य नाटकेषु स्त्रीणां स्वभावचित्रणं कृतमित्यनुमातुं शक्यमेव। कविप्रवरयोरुभयोरपि कृतिषु स्त्रियः पुत्रस्नेहस्य उदात्तभावं प्रदशयन्त्यो मातृरूपिण्यः, भर्तुरभिमतमनुगच्छन्त्यः सहधर्मिण्यः, प्रियेषु अत्यन्तमनुरागमाचरन्त्यः प्रियतमाः, परस्परस्नेहस्य सुदृढतां प्रदर्शयन्त्यः सख्यः इत्येवं विभज्य द्रष्टुं शक्यते।

तत्कालीनसामूहिकसांस्कृतिकनवोत्थाने परिवर्तने परिष्करणे च अत्यन्तमुत्सुकिन्यः इमे नायिकाः स्वकीयेन आदर्शमहिम्ना स्वभावकान्त्या च नायकानपि अतिशेरते। राष्ट्रियसामूहिकधार्मिकनैतिकविषयेषु नारीणामद्भुतं योगदानं प्रपञ्चयति भासः। तदानीन्तनस्त्रीसमाजस्य जीवनं भासकालिदासयोः कृतिषु प्रतिबिम्बितं दृश्यते। धर्मस्य, त्यागस्य, प्रणयस्य, विनयस्य, पारस्पर्यजीवनस्य, सत्यस्य च उत्तमोदाहरणान्येव भासकालिदासयोः स्त्रीपात्राणि। 'प्रेम्णा शरीरार्थहरां हरस्य' इति कविवचनं साक्षात्कुर्वत्यः इमाः नायिकाः द्वयोरपि कृतिषु परिलसन्ति। पत्युः सुखं हितं च परिपाल्य सुदृढस्नेहस्य पाशेन बद्धा भवति आर्षपरम्परायां पतिव्रता। दम्पत्योः गाढानुराग एव कुटुम्बस्य चैतन्यमिति साधितं दृश्यते बहुत्र। अस्योदात्तं निदर्शनं भवति स्वप्नवासवदत्ते वासवदत्ता। तथा प्रतिमानाटके सीता च। भर्तुः मनोऽभिलाषमवगत्य तदनुगुणं यथा इयं प्रियमाचरति तथैव प्रियतमसुखाकाङ्क्षिणी शकुन्तलापि समाचरति। भर्त्रा परित्यक्ता इयं भर्तारमपराधिनं नामन्यत। निःस्वार्थस्नेहस्य त्यागस्य च मातृकास्वरूपिणी शकुन्तला न कदापि

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**पत्युर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो: वामाः कुलस्याधयः॥** (शाकु.4/18)

इति सारोपदेशवचनं विस्मरति। अपि च स्वापराधमवगत्य पादयोः निपतितं दुष्यन्तम् इत्थं बोधयति। 'नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखम् आसीत्' इति। क्लेशार्णवे पतितम् आर्यपुत्रं समाश्वासयन्ती इयं केषां सहृदयानां मनो न रञ्जयति। अभिषेकनाटके आर्यपुत्रस्यास्मिन् जनेऽनुक्रोशं परिश्रमं च श्रुत्वा सुखस्य दुःखस्य चान्तरे दोलायते इव मे हृदयमिति प्रलपन्ती सीता भर्तृस्नेहस्य पवित्रतां प्रदर्शयति। रामस्य अत्यन्तव्यथायाम् अमृतबिन्दुवदाचरति सीता। ''यावदिदानीमीदृशशोकविनोदनार्थमवस्थाकुटुम्बिनीं मैथिलीं पश्यामि'' इति रामवचनमस्य निदर्शनमेव। कालिदासस्य विक्रमोर्वशीये देवी भर्तुः प्रणयिनीसमागमे अनीर्ष्यामित्थं प्रदर्शयति--'अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रस्य समागमप्रणयिनी तया सह मया प्रतिबन्धेन वर्तितव्यम्' इति।



'अल्पं तुल्यशीलानि द्वन्द्वानि सृजन्ते' इति प्रतिमानाटकवचनं, 'समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः' इति शाकुन्तलवचनं च दाम्पत्यबन्धस्योत्कृष्टतां प्रकटीकरोति। विच्छिन्नाभिषेकवृत्तान्तमवगत्य 'प्रियं मे महाराज एव महाराजः, आर्यपुत्र एव आर्यपुत्रः' इति वदन्ती सीतादेवी त्यागस्य उदारमूर्तिः इव संदृश्यते। काननं गन्तुकामं रामं 'सहधर्मचारिणी खल्वहम्' इति कथयन्ती सीता सुखे दुःखे च स्वकान्तमनुगत्य सहधर्मश्चर्यतामित्यार्षवचनं सार्थकं करोति।

भारतीयपरम्परायां मातृत्वस्य परमोदात्तं स्थानमुपकल्पितमेव। शाकुन्तले मेनका, माता गौतमी, सानुमती, प्रतिमानाटके कौसल्या, कैकेयी, ऊरुभङ्गे गान्धारी इत्यसंख्येयाः मातृदेवताः भासकालिदासयोः कृतिषु दरीदृश्यन्ते। महाराजेन दुष्यन्तेन परित्यक्तां शकुन्तलां माता मेनका स्वर्गीयसुखमप्यविगणय्य पर्यपोषयत्। शकुन्तलायै मातृनिर्विशेषं स्नेहं प्रयच्छन्ती सानुमती, मध्यमव्यायोगे वृद्धा ब्राह्मणी एवमारभ्य महनीयादर्शयुताः बह्व्यः मातरः 'कुपुत्रो जायेत, क्वचिदपि कुमाता न भवति' इति भगवतः शङ्कराचार्यस्य वचनमनुस्मारयन्ति। मध्यमव्यायोगे

**'पतिमात्रधर्मिणी पतिव्रतेति नाम। गृहीतफलेनैतेन शरीरेणार्थं कुलं च रक्षितुमिच्छामि'** इत्युक्त्वा पत्युः स्वकुटुम्बस्य च रक्षणाय प्रवर्तमाना वृद्धमाता सर्वेषां मानसमार्द्रीकरोति। मातुः अगणितगुणगणैः प्रेरितेन दुर्योधनेन ऊरुभङ्गे निधनगमनवेलायां

**नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्।**
**अन्यस्यामपि जात्यां मे त्वमेव जननी भव॥** (ऊ. 1/50)

इति यदुक्तं तत् शङ्कराचार्यस्य ''तस्यै जनन्यै नमः'' इति मातृपञ्चकवचनमनुस्मारयति। प्रतिमानाटके ''अस्निग्धा पुत्रप्रसविनी खल्वहम्'' इति विलपन्ती कौसल्या स्वान्तरङ्गे जाज्वल्यमानं पुत्रविरहाग्निं सोढ्वा दशरथं समाश्वासयति 'अलमिदानीं महाराजेनातिमात्रं सन्तप्य परवशमात्मानं कर्तुं'मिति। सपत्नीनामुदात्तस्नेहः मालविकाग्निमित्रे मालविकाधरण्योर्मध्ये संदृश्यते। स्वप्नवासवदत्ते वासवदत्तापद्मावत्योश्च समानस्नेहः प्रकटितो दृश्यते। प्रतिमानाटके तावत्

**इयं स्वयं गच्छतु मानहेतोर्मातेव भावं तनये निवेश्य।।**

इति रामवचनं सीतायाः बन्धुस्नेहपरतां द्योतयति। अङ्गना सर्वदा सर्वथा च रक्षणीया इत्युदात्तसङ्कल्पः समस्यासङ्कीर्णस्य आधुनिकसमाजस्य चैतन्यप्रदायकमौषधमेव। तदित्थं दृश्यते प्रतिमानाटके 'रामो लक्ष्मणवैदेही' इति सुमन्त्रेण कथ्यमाने सति दशरथेन इत्थमुच्यते–

**रामो वैदेही लक्ष्मण इत्यभिधीयताम्।**

**रामलक्ष्मणयोर्मध्ये तिष्ठत्वत्रापि मैथिली।**

**बहुदोषाण्यरण्यानि सनाथैषा भविष्यति।।** इति।

इयं तत् स्त्रीमयं तपोजातं क्षेत्रोदराद्वलात् जनकस्य नृपेन्द्रस्य तपसः सन्निदर्शनम्। भरतस्य इदं वाक्यं सीतायाः समस्तगुणसम्पन्नतामेव द्योतयति।

पारिस्थितिकसन्तुलने पारस्पर्यजीवने, भूतदयायां च दत्तश्रद्धाः नैकाः वनिताः भासेन कालिदासेन च चित्रिताः।

'प्रियमण्डनापि पल्लवान् न लुम्पति' इति भासेन 'नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्' इति कालिदासेन च प्रयोगः कृतः। वृक्षलतादिषु सहजीविषु च कारुण्यस्य मूर्तिरूपेण विराजते शकुन्तला।

'अस्ति मे सोदरस्नेहोप्येतेषु' इति

**''पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**

**आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।''** इति।

'तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये' इति।

**''उद्गलितदर्भकबला मृग्यः, परित्यक्तनर्तना मयूराः।**

**अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः''** इति।

**''यस्य त्वया व्रणविरोपणमिङ्गुन्दीनाम्**

**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।**



**श्यामाकमुष्टिपरिवर्द्धितको जहाति**

**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।''** इति च।

सहजीविप्रेम्णः उदात्तान्युदाहरणानि अनन्तान्येव। इत्थम् एव प्रतिमानाटके प्रकृतेः मानवीकरणस्य असंख्येयान्युदाहरणानि उपलभ्यन्ते। ''यावदार्यपुत्रो नागच्छति तावदिमान् बालवृक्षानुदकप्रदानेन अनुक्रोशामि'' इति सीतावचनमस्य निदर्शनमेव। क्लेशमयं काननजीवनमपि सानन्दमास्वादयति भासस्य सीतादेवी। पश्यन्तु–

**योऽस्याः करः श्राम्यति दर्पणेऽपि**

**स नैति खेदं कलशं वहन्त्याः।**

**कष्टं वनं स्त्रीजनसौकुमार्यं**

**समं लताभिः कठिनीकरोति।।**

इति रामवचनं सीतायाः जीवनस्य चित्रणमेव प्रददाति। कुलमहिम्ना सीता राक्षसराजेन रावणेनाप्याद्रियते, तत् इत्थम्–

**''इयमेका पृथिव्यां हि मानुषीणामरुन्धती।**

**यस्या भर्त्रेऽति नारीभिः सत्कृतः कथ्यते भवान्।।''**

**''त्यक्त्वा स्नेहं शीलसङ्क्रान्तदोषैः**

**पुत्रास्तावन्नन्वपुत्राः क्रियन्ते।**

**लोकेऽपूर्वं स्थापयाम्येव धर्मं**

**भर्तृद्रोहादस्तु माताप्यमाता।।''** (प्र.ना.)

इति भरतवचनं स्त्रीभिः सामूहिकनीतेः विघातः न कार्यः इत्यस्मान् प्रबोधयति। तत्रैव कैकेयी क्षमया धरित्री इत्यस्माननुस्मार्य संयमितचित्ता भरतं सम्मुखीकरोति। (**'कुनदीव प्रवेशिता न शोभते।'** प्र.ना.3/16)

भासकालिदासयोः कथापात्राणि तत्रापि विशिष्य स्त्रीपात्राणि उदात्तगुणानां मुकुटोदाहरणत्वेन विराजन्ते। माता वा, पुत्री वा, प्रणयिनी वा, स्नुषा वा, तपस्विनी वा भवतु ताः भारतीयपरम्परानुगुणम् अस्मत्संस्कृत्यनुसारेण कीदृश्यः स्युः इत्यस्मान् प्रबोधयन्ति। भासस्य कालिदासस्य च नाटकेषु समावेशितानां स्त्रीकथापात्राणां

जीवनमनुसन्दधेमश्चेत् साम्प्रतं समाजेन सम्मुखीक्रियमाणाः नैकाः समस्याः परिहृताः भवेयुः। इत्थम् अनयोः स्त्रीपात्राणि न केवलं प्राचीनकाले अर्वाचीनकाले वा प्रत्युत भविष्यत्काले समाजस्यापि पथप्रदर्शिकानि भूत्वा समाजस्य पारस्पर्यं सम्पाद्य समाजस्य सामूहिंक सांस्कृतिकं च नवोत्थानं साधयितुं प्रेरकाणि भवेयुः इत्याशास्यते।

❖



# चण्डीशतके विवर्तवादः

रीना देवी

रूपेषु परिवर्तनम् अवस्थायां परिवर्तनं वा विवर्तः कथ्यते। वस्तुषु स्वस्वरूपस्य परित्यागं विना अपरस्य वस्तुनो मिथ्याभासः विवर्तोऽस्ति–

**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः।**[1]

यथा–यदा रज्जौ स्वस्वरूपं अपरित्यज्यैव सर्पस्याकारः प्रतीयते तदा सा सर्पाकृतिः रज्जोः विवर्तः कथ्यते। अर्थात् रज्जोः स्वस्वरूपस्य विनाशं विना सर्परूपेण मिथ्याप्रतीतिः विवर्तोऽस्ति। अस्मिन् वस्तुनि स्वयथार्थरूपं न विनश्यति, अपितु तस्मिन् प्रथमरूपे किञ्चित्कालविशेषाय अन्यरूपस्य प्रतीतिः भवति। किञ्चित्कालान्तरं भ्रान्तौ नष्टायां सत्यां वस्तुनः यथार्थरूपं दृश्यते।

चण्डीशतके वर्णितः अज्ञानस्य विवर्तः महिषोऽस्ति। तस्य अज्ञानस्य स्वरूपं कीदृशमस्ति? सः उग्रान्धकार इव उत्पाती अस्ति।[2] योऽन्धकारः ज्ञानेन विना न क्षीयते सः अज्ञानान्धकारोऽत्र उग्रान्धकारपदवाची भवितुमर्हति इति भावः। उपनिषद्वाक्येषु[3] अन्धकारात् प्रकाशं प्रति नयतु इति कथने आज्ञानान्धकारात् ज्ञानप्रकाशं प्रति नयतु इति प्रार्थ्यते।

इत्थमेव गहनतिमिरस्य उल्लेखं बाणभट्टः शुकनासोपदेशेऽपि अकरोत्। लक्ष्मीमदयौवनादिश्च सूर्यप्रकाशेनापि अभेद्योऽस्तीत्यतः अतिगहनमस्ति तत्तमः इति तत्र कथ्यते।[4]

अंधकारस्य वर्णः कृष्णोऽस्ति। सः महिषश्चापि कृष्णवर्णोऽस्ति। महिषः अज्ञानस्य विवर्तोऽस्ति, अतएव शरीररहितः अस्ति।[5] अज्ञानाभिमानक्रोधदम्भाश्च

सर्वे आसुरीसम्पदः।[6] सर्वे कृष्णवर्णाः अनङ्गाश्च सन्ति। अहिंसासत्याक्रोधाः त्यागशान्त्यादयश्च दैवीसम्पदः सन्ति।[7] ते सर्वेऽपि अनङ्गाः किन्तु श्वेतवर्णाः सन्ति। महिषः अज्ञानान्धकारः क्रोधश्चास्ति, अतएव अनङ्गोऽस्ति। स स्वयं कथयति–कामदेवः अनङ्गोस्ति, अहमपि अनङ्गोस्मि, शिवः कामदेवं तु भस्माकरोत्, किन्तु मां दग्धुं सोऽसमर्थोऽस्ति।[8] यदि महिषः अज्ञानान्धकारस्य विवर्तोऽस्ति तर्हि सः सामान्यो महिषः कथं भवितुमर्हति? स स्वयं कथयति–भोः सूर्य! ममोपरि चरणन्यासं कर्तुम् इच्छसि? अहं सामान्यमहिषः नास्मि।[9]

स महिषः छद्मवेषी अस्ति। वस्तुतः स देवानाम् अहङ्काररूपी शत्रुः अस्ति। आज्ञानाभिमानादीनाम् अवगुणानां विवर्तः महिषः स्वशत्रून् देवान् छलयति।[10] यदा महिषः दर्पयुक्तः भवति तदा तस्मिन् उचितानुचितयोः विवेकस्य अभावः भवति। कदाचित् सोत्प्रोसवचनं कथयति कदाचित्तु अपभाषणं करोति।[11] वस्तुतः न कोऽपि महिषोऽस्ति न चासुरः। यदा देवेषु अहंकाराज्ञानं प्राविशत् तदा ते आत्मानं सर्वश्रेष्ठान् अमन्यन्त। देवानाम् इदमेव दर्पाज्ञानं विनष्टुं सा आविर्भवति।[12] स महिषः एतादृशः अंधकारोऽस्ति यः अग्नेरगम्योऽस्ति[13], इन्द्रोऽपि तच्छमने असमर्थोऽस्ति[14] द्वादशकलावता सूर्येणापि अभेद्योऽस्ति[15] देवानां सभया सह विराजमानस्य इन्द्रस्य सहस्रनेत्राणां ज्योतिः म्लानं न करोति उग्रान्धकारम्।[16] तस्योपरि अस्त्रशस्त्राण्यपि प्रभावहीनानि आसन्। अतएव शरः तं प्राप्तुं न समर्थोऽभवत्, असिरपि किञ्चित् कर्तुं न प्रभवति, वज्रप्रहारः व्यर्थः आसीत्, पुनः शङ्खोः का कथा? चक्रस्य गतिः व्युत्क्रमाभवत् तर्हि परशोः वार्ता का?[17] यः शूलस्य प्रहारेऽपि शैलः इव अचलोऽस्ति,[18] बाणे तस्योपरि युक्तेऽपि न निमिषति तत् नेत्रम्,[19] पट्टिशस्य प्रहारे सः अट्टहासं करोति,[20] प्रासस्य प्रयोगे मन्दस्मितं करोति,[21] कुलिशप्रयोगे सः अव्याकुलः,[22] शङ्कुप्रहारे न शङ्कितः,[23] चक्रप्रयोगे अवक्रः,[24] कृपाणस्य प्रहारे सः न कृपणः,[25] स साधारणमहिषः नास्ति, अपितु अज्ञानमस्ति। अतएव प्रथमावसरे एषा स्थितिः अभवत् यत् विष्णोः सुदर्शनं विफलमभवत्,[26] देवानां सैन्यः पराङ्मुखी,[27] शक्रस्य धनुषः ज्यापि विफलाभवत्,[28] शिवस्यापि इयमेव स्थितिरभवत्।[29]

सः अनङ्गमहिषः ब्रह्मणः साम्ना,[30] हरेः चक्रेण द्वितीयप्रहारेण,[31] इन्द्रस्यैरावतस्य



दानवृष्ट्या,[32] यमदण्डेन चतुर्थोपायेन[33] न शान्तोऽभवत्, महिषस्य रोम्णि विष्णोः चक्रं विफलमभवत्,[34] शिवशरः तस्य चर्मापि भेत्तुं न समर्थोऽभवत्।[35]

इत्थमेव नीतिशतके 'मूर्खपद्धत्यां' कथितम्–अज्ञानानां पुरुषाणां किमपि औषधं नास्ति अर्थात् ज्ञानातिरिक्तः कोऽपि मार्गः नास्ति।[36] महिषेणातङ्किताः भूत्वा रुद्रसमूहे पलायिते सति,[37] सूर्ये कम्पिते सति,[38] इन्ददेवस्य वज्रे ध्वस्ते,[39] चन्द्रमसि शङ्किते,[40] वायौ विरमति,[41] त्यक्तवैरे कुबेरे,[42] वैकुण्ठे कुण्ठितास्त्रे,[43] दर्पात्युग्रमहिषस्य विनाशाय देवी अवतरति।

देवी तं देवारिं हन्तुम् अवतरति यस्मिन् अज्ञानान्धकारः क्रोधश्चास्ति।[44] देव्यवतारः तु देवेषु सर्वश्रेष्ठोऽस्ति इति अहंकारं नाशयितुं प्राभवत्। देवी स्वज्ञानचरणेन देवेषु प्रविष्टमहंकारम् अनाशयत्।[45] यथा गीतायां भगवता कृष्णेन कथ्यते–यदि आकाशे युगपत् सहस्रं सूर्याः उदिताः भवेयुः तर्हि सम्भवतः तस्य विश्वरूपस्य तेजस्तादृशं भविष्यति।[46] तथैव तस्याः देव्याः वामचरणस्य पञ्चभ्यः नखेभ्यः अद्भुतः प्रकाशः आविर्भूतः, येन महिषान्धकारः नष्टः अभवत्।[47] महिषः कालुष्यमप्यस्ति। तद् विनाश्य ज्ञानं प्रकाशयितुं ज्ञानप्रदीपस्य आवश्यकता अस्ति। अतएव अस्त्रशस्त्रापेक्षया सा दृष्टिमात्रेण तम् अदहत्।[48]

रात्रिः अंधकारयुक्ता भवति, अनेकानेकानि उचितानुचितकार्याणि शल्यामेव भवति। तेषां नाशः सूर्योदयेन भवति, तथैव कृष्णमहिषस्य विनाशाय देवी द्वितीयसूर्यः इव अवतरति।[49] देव्याः आविर्भावः भवति, किन्तु सा उत्पत्तिशीला नास्ति, नित्या सा। कस्यापि कारणस्य निमित्तं सा शरीरं धरति, पुनश्च कार्यान्तरं यावत् सा नित्यस्वरूपेषु अन्तर्लीयते। दुर्गासप्तशत्यां कथ्यते–देवानां कार्यसिद्ध्यर्थं सा आविर्भवति, लोकाश्च तां 'उत्पन्ना' इति मन्यन्ते।[50] यस्य महिषस्य नाशं विष्णुशिवेन्द्रादयः कर्तुं न प्रभवन्ति सः देव्याश्चरणेन साधितः।[51] देव्याश्चरणः अशिवतत्त्वानि विनश्य शिवत्वं साधयति।[52] इत्थं देवी महिषस्यान्तं कृत्वा सर्वलोकान् कण्टकरहितान् अकरोत्।[53] सा शिवा या नित्यास्ति, विश्वस्य प्राणिनां अनवरतमुपकारं करोति या प्रकृतिः उपकारशीला विकाररहिता सा शिवायास्तु वः[54] इत्थं दर्पाभिमानी महिषः चण्ड्याश्चरणेन स्वर्गस्थः अभूत्। महिषः अनङ्गः आसीत् किन्तु कविना 'अतन्वनङ्गान्धकार' इति रूपेण तस्य कथनेन एतद् उत्प्रेक्षितुं शक्यते

यत् सः अज्ञानान्धकारस्य विवर्तः आसीत्। देव्या तस्य नाशनेन ज्ञानप्रभा उद्भासिता तेन च शिवत्वम् आसादितम् इति।

❖

## सन्दर्भग्रन्थाः


1. वेदान्तसारः - सदानन्दकृतः सं. कृष्णकान्त त्रिपाठी, पृ.104
2. उत्पातोदग्रान्धकारागममिव महिषं - चण्डीशतके - 42
3. तमसो मा ज्योतिर्गमय
4. अभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् : कादम्बरी : शुकनासोपदेशः- सं. कृष्णावतार वाजपेयी, पृ.19
5. दन्तज्योत्स्नावितानैरतनुभिरतनुर्न्यक्कृतार्धेन्दुभाभिः, च. 48
6. दम्भो दर्पोऽभिमानश्च ... श्रीमद्भगवद्गीता 16/4
7. अहिंसा सत्यमक्रोध ... श्रीमद्भगवद्गीता 16/2
8. शृङ्गे पश्योर्ध्वदृष्ट्याधिकतरमतनुः सत्र पुष्पायुधोऽस्मि। च.62
9. भानोः किं वीक्षितेन महिषतनौ त्वं हि संन्यस्तपादो - च.85
10. देवारेर्दानवारेर्द्रुतमिह महिषच्छद्मनः पद्मसद्मा, च.69
11. सोत्रासालापपातैरिति दनुजमुमा निदर्हन्ती दृशा वः - च.27
12. पिंषच्छैलेन्द्रकल्पं महिषमतिगुरुर्भग्नगीर्वाणगर्वं - च.93
13. गम्यं नाग्नेः - च.42
14. न चेन्दोः - च.42
15. दिनकृतां द्वादशानामसह्यं - च.42
16. शक्रस्याक्ष्णां सहस्र सह सुरसदसा सादयन्तं प्रसह्य , च.42
17. अप्राप्येषु रुदासितसिरशनेरारात्कुतः शङ्कुतः।
    चक्रव्युत्क्रमकृतपरोक्षपरशुः शूलेन शून्यो यया।। च.56





18. शूले शैलाविकम्पं - च.52
19. न निमिषिमिषौ - च.52
20. पट्टिशे साट्टहासं - च.52
21. प्रासे सोत्रास ,,
22. अव्याकुलमपि कुलिशे ,,
23. जातशङ्कं न शङ्कौ ,,
24. चक्रेऽवक्रं ,,
25. कृपाणे न कृपणं ,,
26. चक्रं शौरे प्रतीपं चं.65
27. प्रतिहतमगमत्प्राग्द्युधाम्नां तु पश्चाद् ,,
28. अपच्चापं बलारर्न परमगुणतां ,,
29. पुस्त्रयालोषिणोऽपि ,,
30. साम्ना नाम्नाययोनेर्धृतिमकृत चं.46
31. हरेर्नापि चक्रेण भेदात् ,,
32. इन्द्रस्यैरावतस्याप्युपरि कलुषितः केवलं दानवृष्ट्या - च.46
33. दान्तो दण्डेन मृत्योर्न च विफलयथोक्ताभ्युपायो हृतोऽरि - च.46
34. चक्रं चक्रायुधस्य क्वणति निपतितं रोमणि ग्रावणीव - च.73
35. स्थाणोर्वाणश्च लेभे प्रतिहतिगुरुणा चर्मणावर्मणेव - च.73
36. सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् - नीतिशतकम् -11
37. विद्राणे रुद्रवृन्दे - च.66
38. सवितरि तरले ,,
39. वज्रिणि ध्वस्तवज्रे ,,
40. जाताशङ्के शशाङ्के ,,
41. विरमति मरुति ,,
42. त्यक्तवैरे कुबेरे ,,
43. वैकुण्ठे कुण्ठितास्त्रे ,,

44. यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः। च.73

45. गौरी वोऽव्यात्क्षतारि स्वचरणगरिमग्रस्तगीर्वाणगर्वा। च.29

46. दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद् भासस्तस्य महात्मनः। गीता 11/12

47. देवी वो वामपादाम्बुरुहनखमयैः पञ्चभिश्चन्द्रमोभिः। च.42

48. दनुजमुमा निदर्हन्ती दृशा वः। च.27

49. तस्य ध्वंसात्सुताद्रेरपरदिनपतिः पातु वः पादपाते। च.68

50. देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते।। दु.सप्त. 1/48

51. स पादः सुखयतु भवतः पञ्चमश्चण्डिकायाः। च.46

52. त्रैलोक्या क्षेमदाता भुवनभयहरः शंकरोऽतो हरोऽपि। च.88

53. त्रिभुवनं निःशल्यकल्पं तया। च.56

54. शश्वद्विश्वोपप्रकृतिरविकृतिः सास्तु शान्त्यै शिवा वः। च.6

❖



# 'साधकतमं करणम्' इति सूत्रस्य विशकलितार्थः

**डॉ. श्रीप्रकाश पाण्डेयः**

कृधातोः 'करणाधिकरणयोश्च (3.3.117) इति सूत्रेण ल्युटि करणमिति व्युत्पाद्यते तच्च कारकं तृतीयविभागरूपम्। इदं करणं फलप्राप्तौ साधकेषु सर्वप्रमुखं भवति; अत एव सूत्रे साधकम् इति न कथयित्वा तमप्प्रत्ययविशिष्टं साधकतममिति विशेषणं प्रयुक्तम्। साध् (संसिद्धौ) धातोः साध्नोति अनेन इति विग्रहे ण्वुलि साधकं निष्पद्यते। पुनः 'अतिशायने तमबिष्ठनौ' (5.3.55) इत्यनेन अतिशयेन साधकम् इति विग्रहे 'साधकतम'मिति निष्पद्यते, यस्यार्थः प्रकृष्टं साधकं वा प्रकृष्टम् उपकारकमिति। यत्कारकं प्रकृष्टम् उपकारकं तदेव करणसंज्ञकं भवतीति सूत्रार्थः।

अतिशायने तमप्प्रन्ययविशिष्टं साधकतममिति विशेषणं प्रयुक्तम्। अतिशायने तमप् इत्यनेन ज्ञायते यत् क्रियासिद्धौ किं वा फलसिद्धौ यत् सर्वातिशायि भवति तदेव साधकतममिति कथयितुं शक्यते। श्रीभट्टोजिदीक्षितः एतस्य व्याख्यानक्रमेण कथयति यत् क्रियासिद्धौ प्रकर्षेण सर्वातिशायि उपकारकं कारकं करणसंज्ञं स्यात्। तद्विषये कर्तृकरणयोस्तृतीया इत्यनेन तृतीयाविभक्तिर्भवति।

काशिकावृत्तिः वदति यत् क्रियासिद्धौ यत्प्रकृष्टोपकारकं विवक्षितं तत्साधकतमं कारकं करणसज्ञं भवति। क्रियासिद्धिः नाम क्रियाफलसिद्धिः। सूत्रे क्रियासिद्धिविषयऽर्थे बालमनोरमायां श्रीवासुदेवदीक्षितः लिखति यत् "कारकाधिकारलभ्यमिदम्।" सूत्रेऽस्मिन् 'कारके' इत्यनुवर्तते अतः सूत्रे क्रियासिद्धिः इत्यर्थः फलति। पदमञ्जरीकारः हरदत्तः एवं विचिन्तयति यत् "सिधू संराद्धौ इत्यस्य हेतुमण्ण्यन्तस्य "सिद्ध्यतेरपारलौकिके" इत्यात्वे 'राधू साधू संसिद्धौ' इत्यस्य वा ण्यन्तस्य वा साधकशब्दः क्रियात्मकश्चार्थः।

प्रकृष्टम् उपकारकं किं भवति इत्यवगन्तुं प्रकृष्टशब्दस्यार्थावगमनमावश्यकं यतः क्रियासिद्धौ तन्ताम क्रियाफलसिद्धौ सर्वाणि कारकाणि उपयोगीनि सन्ति। कस्यचिदेकस्याप्यभावे क्रियासिद्धिः बाधिता भविष्यति। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत्प्रकृष्टम्।[1] अर्थात् यस्य व्यापारस्य–अवान्तरव्यापारस्य समनन्तरमेव क्रियासिद्धिः (क्रियाफलसिद्धिः) भवेत् तत्प्रकृष्टम् उच्यते। एवंविधस्य व्यापारस्य आश्रयरूपे यस्य विवक्षा स्यात् तत् 'करण' नामकं कारकम् उच्यते।[2] अत्र हेलाराजः लिखति

यत्–''सन्निपत्योपकारिषु सर्वेष्वपि साधनेषु यद्व्यापारानन्तरभाविनी क्रिया लक्ष्यते तदवाप्तातिशयं साधकतमं करणम्।''

''देवदत्तः स्थाल्यां काष्ठैरोदनं पचति'' इति वाक्ये काष्ठस्य ज्वलनव्यापारस्य अनन्तरमेव नियमितरूपेण पाकः भवति। अतः काष्ठस्य करणसंज्ञा अर्थात् पाकक्रियासिद्धौ अत्यन्तमुपकारित्वात् काष्ठं करणमुच्यते। फलतः दर्शनक्रियायां चक्षुः श्रवणक्रियायां त्वगादीनि इन्द्रयाणि करणनाम्ना उच्यन्ते। एतानि बाह्यकरणानि उच्यन्ते तथा च चिन्तनक्रियायां मनः आभ्यन्तरकरणमुच्यते।

प्रसङ्गेस्मिन् अवधेयं यत् करणं विवक्षाधीनं भवति। वक्ता किमपि वस्तु अत्यन्तोपकारकावस्थायां न दर्शयित्वा अन्यप्रकारेण दर्शयितुम् एष्यति चेत् तत्र तदनुकूलकारकस्य प्रयोगं करिष्यति। स्थाली पचति, स्थाल्या पचति, स्थाल्यां पचति इत्यादीनि उदाहरणानि विवक्षाधीनानि भवन्ति। अतएव कुत्रचित् 'दात्रेण लुनाति' इत्यस्य स्थाने 'बलेन लुनाति' तथा 'चक्षुषा पश्यति' इत्यस्य स्थाने 'आलोकेन पश्यति' इत्यस्यपि प्रयोगः क्रियते। करणम् अनिर्देश्यं भवति तथा वस्तुव्यवस्थितं न भवति। द्रष्टव्या कारिकेयम्–

**वस्तुतस्तदनिर्देश्यं न हि वस्तुव्यवस्थितम्।**
**स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते ततः॥** (वाक्यपदीयम् 3.7.91)

यथा गोत्वं प्रतिगु निश्चितररूपेण भवति तथैव करणत्वं किं वा कर्तृत्वादिकं कस्मिंश्चिद् एकस्मिन्नेव वस्तुनि व्यवस्थितं भवितुं नार्हति अपितु विशेषणविशेष्यभाववत् अनिश्चितं वक्तुश्च विवक्षाधीनं भवति। कृष्णा गौः गच्छति, शुक्ला गौः गच्छति, गौः कृष्णा अस्ति गौः शुक्ला अस्ति इत्यादिप्रयोगैः विशेषणविशेष्यभावस्य अव्यवस्थितातायाः ज्ञानं भवति।

अत्र इदमवधेयं यत् प्रकृष्टोपकारकतायाः एका कक्षा भवति। तत्र अनेकानि प्रकृष्टोपकारकाणि भवितुं शक्नुवन्ति, नानि सर्वाणि करणनाम्ना कथयिष्यन्ते। प्रकृष्टोपकारकता, अन्यकारकाणि दृष्टौ निधाय, चिन्तनीया। अतः सः अश्वेन पथा दीपिकया याति–इत्यस्मिन् वाक्ये एकस्मिन्नेव काले बहूनां करणसंज्ञा भवति–

**स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते।**
**आश्रितातिशयत्वं तु परतस्तत्र लक्षणम्॥** (वाक्यपदीयम् 3.7)

सूत्रे साधकशब्दस्य अनन्तरं तमप्प्रत्ययं प्रयुज्य अतिशयसाधकम् इत्यर्थः स्वीकृतः। तमब्ग्रहणं किम् इति प्रश्नस्य आशयः अस्ति यत् सूत्रे तमब्ग्रहणं न क्रियते चेदपि कार्यसिद्धिः भवितुमर्हति। तमब्ग्रहणं कृत्वा सूत्रकलेवरः एव वर्धितः



इति। कार्यं साधयितुम् इयं युक्तिः यत् प्रकृतसूत्रे कारके इत्यस्य अधिकारः आयाति, तेन 'कारकं साधकम्' इति बोधः भविष्यति अर्थात् साधकशब्देन सह तस्यैव अर्थस्य प्रतिपादयितुः अनुवृत्तस्य कारकस्यापि प्रयोगः साधकतमम् इत्यर्थं वदिष्यति, तमब्ग्रहणं निष्प्रयोजनमस्ति। किं वा करणम् इति महती संज्ञा। अस्यापि फलमिदं भविष्यति यत् प्रकृष्टं साधकं करणसंज्ञकं स्यात्। पुनः तमब्ग्रहणस्य किं प्रयोजनम् अस्ति? तमब्ग्रहणस्याभावे प्रकृष्टस्य अर्थस्य प्रवृत्तौ एकम् अन्यं लौकिकम् उदाहरणम् अपि अस्ति। 'अभिरूपाय कन्या देया' इति उक्ते सति स्वतः सिद्धमिदं यत् सा अनभिरूपाय नैव दास्यते तथा अभिरूपेषु अपि अभिरूपतमाय दास्यते। एवमेव अत्रापि यत् साधकतमं भविष्यति तदेव करणसंज्ञकं भविष्यति। एतस्य उत्तरं भाष्यकारेण दत्तं यत् ''एवं तर्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः कारकसंज्ञायां तरतमयोगो न भवती''ति (महाभाष्यम् 1.4.42)। अर्थात् आचार्यपाणिनिः तमपः प्रयोगं कृत्वा अत्र ज्ञापयति यत् कारकाधिकारेऽस्मिन् तरप्तमपौ विहाय केनचित् अन्यप्रकारेण शब्दसामर्थ्येन ज्ञातः प्रकर्षः नेव ग्राह्यः (स्वीकरणीयः)।[3] एतस्य ज्ञापनस्य फलमिदं भवति यत् 'गङ्गायां घोषः' इति वाक्ये गङ्गापदात् सप्तमी भवति। प्रकृतसूत्रे तमब्ग्रहणं नाभविष्यच्चेत् गङ्गायां घोषः इत्यत्र सप्तमी नाभविष्यत्।

यदि ज्ञापनं नाभविष्यत् तर्हि उक्तशैल्या एव आधारोधिकरणम् (1.4.45) इत्यस्य व्याख्या अभविष्यत्। सा व्याख्या एवम् अभविष्यत् यत् लघुसंज्ञया एव कार्यम् अभावष्यत्। तर्हि पुनः 'अधिकरणम्' इति महासंज्ञायाः फलं किमस्ति? प्रश्नस्यास्य उत्तरम् अभविष्यत् यत् अधिकरणसंज्ञायाः प्रयोजनं मुख्याधारस्य अधिकरणसंज्ञा भवेत् इति। अस्य फलमिदम् अभविष्यत् यत् गङ्गायां घोषः इत्यत्र गङ्गापदे अधिकरणसंज्ञा नाभविष्यत् तदनन्तरं च सप्तमी नाभविष्यत् यतो हि घोषस्य मुख्यः आधारः गङ्गापदं नास्ति। अस्यां स्थितौ केवलं तिलेषु तैलम्, दध्नि सर्पिः, सर्वस्मिन् आत्मा अस्ति इत्यदिमुख्याधरस्थलेषु एव सप्तमी अभविष्यत्। तमब्ग्रहणस्य ज्ञापनस्य अनन्तरं पूर्वोक्तविधा व्याख्या (यत्र तमपः अभावे शब्दसामर्थ्येन उत्पन्नस्य प्रकर्षस्य आश्रयं स्वीकृत्य केवलं मुख्याधारे एव अधिकरणसंज्ञा क्रियते स्म) निरस्ता जाता तथा च सर्वविधेषु आधारेषु अधिकरणसंज्ञाकारणतः 'गङ्गयां घोषः' इत्यत्र प्रथमतः अधिकरणसंज्ञा तदनन्तरं च सप्तमी भवति। गङ्गायां गावः, कूपे गर्गकुलम् इत्यादीनि उदाहरणानि अपि एवंविधानि सन्ति।

अत्र एकः विशेषसिद्धान्तः अवधातव्यः। गङ्गायां घोषः इत्यत्रापि हरदत्तभट्टोजिदीक्षितयोः अनुसारं शाब्दबोधस्य पक्षद्वयम् अस्ति–(1) गङ्गापदस्य

मुख्यार्थे धारायां तीरस्य आधाररूपधर्मः उपचरितः भवति। (2) गङ्गाशब्दस्य अर्थः एव लक्षणया तीरः मन्यते।

पक्षद्वयेऽस्मिन् प्रथमपक्षस्वीकरणे एव तमब्ग्रहणं किम्? गङ्गायां घोषः इति प्रश्नोत्तरस्य आवश्यकता भवति। यतो हि प्रथमपक्षे विभक्तिः लाक्षणिकी अस्ति तथा द्वितीयपक्षे प्रकृतिः लाक्षणिकी अस्ति।[4]

नागेशभट्टस्य कथनम् अस्ति यत् संहितायाम् 6.1.72 इत्यस्य "शब्दस्य च शब्देन कोऽन्योभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्" इति भाष्यवचनेन एव इदं ज्ञातमस्ति यत् यदा गङ्गा इत्यनेन घोषस्य अत्यन्तं सामीप्यं भविष्यति अर्थात् व्यवहितं सामीप्यं न भविष्यति तदा एवंविधः प्रयोगः भवति। परन्तु द्वितीयपक्षे इदं कथनं यत् "तत्र तमब्ग्रहणं चिन्त्यप्रयोजनमस्ति" इति उचितं नास्ति। यतोहि तत्रापि 'तीरः' मुख्याधारः तु नास्ति। अतः तदंशाय अपि तमब्ग्रहणस्य ज्ञापनस्य आवश्यकता तिष्ठति।[5]

वस्तुतः यदि तमब्ग्रहणं न अभविष्यत् तर्हि व्यवधानेन अपि यत् फलोत्पादकम् अभविष्यत्। तत्रापि (तेषु अपि) करणसंज्ञा अभविष्यत्। तमब्ग्रहणस्य इदं फलमस्ति यत् यत् अव्यवधानेन फलोत्पादकं भवति तदेव करणसंज्ञकं भवति द्रष्टव्यम्–(1) तमपोऽभावे व्यवधानेन फलोत्पादकस्यापि करणत्वोपचारेण तृतीयान्तप्रयोगापत्तिः। बृ.श.शे. अतएव प्रकृष्टस्य परिभाषा भवति–"यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टत्वम्। ल.श.शे।

**सन्दर्भग्रन्थाः**

1. बालमनोरमा, बृहच्छब्देन्दुशेखरः।
2. क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
   विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।। (वाक्यपदीयम्, 3.7.10)
3. (क) इह कारकाधिकारे इतः सूत्रादन्यत्र विना तमब्ग्रहणेन प्रकर्षो नाश्रीयते। न्यासः 1.4.42

   (ख) तत्र तमश्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययमन्तरेणेह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते। प्रदीपः 1.4.42
4. यदा च देशधर्मो घोषं प्रत्याधारभावः स्रोतस्युपचर्यते तदेवं तमब्ग्रहणस्य प्रयोजनम्, यदा तु गङ्गाशब्दस्तीरे वर्तते तदा न प्रयोजनम्, आधेयेन व्याप्तिसम्भवान्मुख्य एवाधारभाव इति। पदमञ्जरी 1.4.42
5. बृ.श.शे. 1.4.42

❖



# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

**आरण्यकम्** (XX) **मार्च 2013** ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

**विंशं वर्षम्, प्रथमोऽङ्कः**
**मार्च 2013**